सप्तशती-चण्डी

Domain. Digitization by eGangotri. Funding

(०४९)

फो- ६१

atta Family Collection, Changu Narayan, B

[illegible]

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

# १ ॐ सप्तसति चण्डीपाठ ॥

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

[illegible]

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

ॐ नमः मङ्गलमूर्त्तये॥ ॐ नमः श्रीचण्डिकायै॥ ज
यन्ती मंगला काली॰ भद्रकाली कपालिनी॥ दुर्गा क्ष
मा शिवा धात्री॰ स्वाहा स्वधा नमोस्तु ते॥ १॥ सर्वमङ्
गलमाङ्गल्ये शिवे सर्वार्थसाधिके॥ शरण्ये त्र्यम्बिके गौरि
नारायणि नमोस्तु ते॥ २॥ ॐ अस्य श्रीसप्तशतिका स्तोत्र॰
मंत्रस्य॰ प्रथमचरित्रस्य॰ ब्रह्मा ऋषी॰ गायत्री॰ छन्द॰ नन्दा श॰ ॥१॥
क्ती॰ रक्तदन्तिका बीजं॰ महाकाली देवता॥ पापक्षयार्थे

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

पावकस्तत्वं श्रीमहाकालीप्रीत्यर्थे पाठे विनियोगः ॥ ब्रह्मणोक्त्वं वेयेन
मः शिरसि ॥ गायत्रीछंदसेनमो मुखे ॥ श्रीमहाकालीदेवतायैनमो हृ
दये ॥ वाग्बीजाय नमो गुह्ये ॥ पावकतत्वायनमः स्तनयोः ॥ ध्यानम् ॥
खड्गं चक्रगदेषुचापपरिघाञ्छूलं भुशुंडीशिरः शंखं संदधतीं करैस्त्रिनय
नांसर्वाङ्गभूषावृताम् ॥ यामस्तौत्स्वपिते हरौ कमलजो हंतुं मधुं कैटभं
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकाम् ॥ १ ॥ ॐ नमश्च

२प+

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

स·शू·
॥२॥
ए२

रिडकाये ॥ ॥ मार्कण्डेय उवाच ॥ सावर्णिः सूर्यतनयो यो मनुः कथ्यते
ष्टमः ॥ निशामय तदुत्पत्तिं विस्तराद्गदतो मम ॥ १ ॥ महामायानुभावेन य
यथा मन्वन्तराधिपः ॥ स बभूव महाभागः सावर्णिस्तनयो रवेः ॥ २ ॥ स्वारो
चिषेन्तरे पूर्वं चैत्रवंशसमुद्भवः ॥ सुरथो नाम राजाभूत्समस्ते क्षितिमण्डले
॥ ३ ॥ तस्य पालयतः सम्यक्प्रजाः पुत्रानिवौरसान् ॥ बभूवुः शत्रवो भूपाः
कोलाविध्वंसिनस्तदा ॥ ४ ॥ तस्यैतैरभवद्युद्धमतिप्रबलदण्डिनः ॥ न्यूनैरपि

एमः
॥२॥

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

सतैर्युद्धे कोलाविध्वंसिभिर्जितः ॥५॥ ततः स्वपुरमायातो निजदेशाधि
पोऽभवत् ॥ आक्रान्तः समहाभागस्तैस्तदा प्रबलारिभिः ॥६॥ अमात्यैर्ब
लिभिर्दुष्टैर्दुर्बलस्य दुरात्मभिः ॥ कोशो बलं चापहृतं तत्रापि स्वपुरे ततः ॥
॥७॥ ततो मृगयाव्याजेन हृतस्वाम्यः सभूपतिः ॥ एकाकी हयमारुह्य ज
गाम गहनं वनं ॥८॥ सतत्राश्रममद्राक्षीद्द्विजवर्यस्य मेधसः ॥ प्रशान्त
श्वापदाकीर्णं मुनिशिष्योपशोभितम् ॥९॥ तस्थौ किंचित्सकालं च

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



श्रुनिनाते नमस्कृतः ।। इत्थं श्वेतश्च विवरं तस्मिन्मुनिवराश्रमे ।। १० ।। सोऽचिं
तयत्तदातत्र मम त्वा क्षुब्धचेतनः ।। मत्पूर्वैः पालितं पूर्वं मयाहीनं पुरं हितं
।। ११ ।। मद्भृत्यैर्मे त्रैरसम[illegible]ग्रैर्धर्म्मितं पाल्यते न वा ।। न जाने सप्रधाना मे शू
रहस्ती सदामतः ।। १२ ।। मम वैरि वशं यातः ।। कान्भोगानुपलप्स्यते ।। सम
मानुगता नित्यं प्रसाद धन भोजनैः ।। अनुवृत्तिं ध्रुवं तेद्य कुर्वन्त्यन्यमम
हीभृतान् ।। असम्यग्व्ययशीलैस्तैः कुर्वद्भिः सततं व्ययं ।। १४ ।। संचितः



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

सोतिदुःखेन क्षयं कोशो गमिष्यति॥ एतच्चान्यच्च सततं चिन्तयामास स
पार्थिवः॥१५॥ तत्र विप्राश्रमाभ्याशे वैश्यमेकं ददर्श सः॥ स पृष्टस्तेन
कस्त्वं भो हेतुश्चागमनेत्र कः॥१६॥ सशोक इव कस्मात्त्वं दुर्मना इव ल
क्ष्यसे॥ इत्याकर्ण्य वचस्तस्य भूपतेः प्रणयोदितम्॥१७॥ प्रत्युवाच स तं
वैश्यः प्रश्रयावनतो नृपं॥ वैश्य उवाच॥ समाधिर्नाम वैश्योहमुत्पन्नो
धनिनां कुले॥ पुत्रदारैर्निरस्तश्च धनलोभादसाधुभिः॥१८॥ विहीनश्च

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



धनैर्दारैः पुत्रैरादायमेधनम् ॥ वनमभ्यागतोदुःखीनिरस्तश्चाप्तबन्धुभिः
॥१९॥ सोहन्नवेद्मिपुत्राणांकुशलाकुशलात्मिकाम् ॥ प्रवृत्तिंस्वज
नानांचदाराणांचात्रसंस्थितः ॥ २० ॥ किन्नुतेषांगृहेक्षेममक्षेमंकिन्नुसां
प्रतं ॥ कथन्तेकिन्नुसद्वृत्तादुर्वृत्ताः किन्नुमेसुताः ॥ २१ ॥ राजोवाच ॥ २२
यैर्निरस्तोभवाँल्लुब्धैः पुत्रदारादिभिर्धनैः ॥ तेषुकिंभवतःस्नेहमनुबध्ना
तिमानसम् ॥ २२ ॥ वैश्यउवाच ॥ एवमेतद्यथाप्राहभवानस्मद्गतंव



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

किंकरोमिनवध्नातिममनिष्ठुरतांमनः॥ २३॥ यैःसन्त्यज्यपितृस्नेहंध
नलुब्धैर्निराकृतः॥ पतिःस्वजनहार्दंचहार्दितेष्वेवमेमनः॥ २४॥ किमे
तन्नाभिजानामिजानन्नपिमहामते॥ यत्प्रेमप्रवणंचित्तंविगुणेष्वपिबं
धुषु॥ २५॥ तेषांकृतेमेनिश्वासोदौर्मनस्यंचजायते॥ करोमिकिंयन्न
मनस्तेष्वप्रीतिषुनिष्ठुरम्॥ २६॥ मार्कण्डेयउवाच॥ ततस्तौसहितौवि सौ॰ १
प्रतंमुनिंसमुपस्थितौ॥ समाधिर्नामवैश्योसौसचपार्थिवसत्तमः॥ २७॥

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

स॰ श॰ ॥५॥

कृत्वानुतौयथान्यायंयथार्हं तेन संविदम्॥ उपविष्टौकथाःकाश्चिच्चक्रतुर्वै
श्यपार्थिवौ॥२८॥ राजोवाच॥ भगवंस्त्वामहंप्रष्टुमिच्छाम्येकंवदस्व
तत्॥ दुःखाययन्मेमनसःस्वचित्तायत्ततांविना॥२९॥ ममत्वंममराज्य
स्यराज्यांगेष्वखिलेष्वपि॥ जानतोपियथाज्ञस्यकिमेतन्मुनिसत्त
म॥३०॥ अयंचनिकृतःपुत्रैर्दारैर्भृत्यैस्तथोज्झितः॥ स्वजनेनचसं
त्यक्तस्तेषुहार्दीतथाप्यति॥३१॥ एवमेषतथाहंचद्वावप्यत्यन्तदुःखितौ

रामः ॥५॥

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

हष्टदोषे पि विषयेममत्वाकृष्टमानसौ ॥ तत्केनैतन्महाभागयन्मो
होज्ञानिनोरपि ॥ ममास्यचभवत्येषाविवेकांधस्यमूढता ॥ ३३ ऋषिरु
वाच ॥ ज्ञानमस्ति समस्तस्यजन्तोर्विषयगोचरे ॥ विषयश्च महाभा
गयातिचैवंपृथक्पृथक् ॥ ३४ ॥ दिवान्धाःप्राणिनःकेचिद्रात्रावं
धास्तथापरे ॥ केचिद्दिवातथारात्रौप्राणिनस्तुल्यदृष्टयः ॥ ३५ ॥ ज्ञा
निनोमनुजाःसत्यंकिन्तुतेनहिकेवलम् ॥ यतोहिज्ञानिनःसर्वेपशु

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



पक्षिमृगादयः ॥३६॥ ज्ञानंच तन्मनुष्याणां यत्तेषां मृगपक्षिणाम् ॥
मनुष्याणांच यत्तेषां तुल्यमन्यत्तथोभयोः ॥३७॥ ज्ञानेपि सति पश्ये
तान्पतंगाञ्छाववंचुषु ॥ कणमोक्षादृतान्मोहात्पीड्यमानानपि क्षुधा
मानुषा मनुजव्याघ्र साभिलाषाः सुतान्प्रति ॥३८॥ लोभात्प्रत्युपका
राय नन्वेते किं न पश्यसि ॥ तथापि ममतावर्त्ते मोहगर्त्ते निपातिताः ॥३९
महामायाप्रभावेन संसारस्थितिकारिणः ॥ तन्नात्र विस्मयः कार्यो योग



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

निद्राजगत्पते ॥४०॥ महामायाहरेश्चैतत्तयासंमोह्यतेजगत् ॥ ज्ञा
निनामपिचेतांसिदेवीभगवतीहिसा बलादाकृष्यमोहाय महा
मायाप्रयच्छति ॥ तयाविसृज्यतेविश्वंजगदेतच्चराचरम् ॥ ४२ ॥ सैषा
प्रसन्नावरदानृणांभवतिमुक्तये ॥ साविद्यापरमामुक्तेर्हेतुभूतासना
तनी ॥ ४३ ॥ संसारबन्धहेतुश्चसैवसर्वेश्वरेश्वरी ॥ राजोवाच ॥ भगवन्का
हिसादेवीमहामायेतियांभवान् ॥ ४४ ॥ ब्रवीतिकथमुत्पन्नासाकर्मास्याः

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

स० श्रा
॥७॥

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

श्चार्थं किं द्विजः ॥ यत्प्रभावा च सा देवी यत्स्वरूपा यदुद्भवा ॥ ४६ ॥ तत्सर्वं श्रो
तुमिच्छामि त्वत्तो ब्रह्मविदां वर ॥ ऋषिरुवाच ॥ नित्यैव सा जगन्मूर्तिस्त
यासर्वमिदं ततं ॥ ४६ ॥ तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां मम ॥ देवानां
कार्यसिद्ध्यर्थमाविर्भवति सा यदा ॥ ४७ ॥ उत्पन्नेति तदा लोके सा नि
त्याप्यभिधीयते ॥ योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते ॥ ४८ ॥
आस्तीर्य शेषमभजत्कल्पान्ते भगवान्प्रभुः ॥ तदा द्वावसुरौ घोरौ विख्या

राम:
॥७॥

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

तौमधुकैठभौ ॥४९॥ विष्णुकर्णमलोद्भूतौहंतुंब्रह्माणमुद्यतौ ॥ सना
भिकमलेविष्णोःस्थितोब्रह्माप्रजापतिः ॥५०॥ दृष्ट्वातावसुरौचोग्रौप्रसुप्तं
चजनार्द्दनम् ॥ तुष्टावयोगनिद्रांतामेकाग्रहृदयस्थितः ॥५१॥ विबोध
नार्थायहरेर्हरिनेत्रकृतालयाम् ॥ विश्वेश्वरींजगद्धात्रींस्थितिसंहारकारि
णीं ॥५२॥ निद्रांभगवतींविष्णोरतुलांतेजसःप्रभुः ॥ ब्रह्मोवाच ॥ त्वं
स्वाहात्वंस्वधात्वंहिवषट्कारस्वरात्मिका ॥५३॥ सुधात्वमक्षरेनित्येत्रि

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



५५

धामात्रात्मिका स्थिता ॥ अर्द्धमात्रास्थिता नित्या यानुच्चार्या विशेषतः ॥
त्वमेव संध्या सावित्री त्वं देवि जननी परा ॥ त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्य
ते जगत् ॥ ५५ ॥ त्वयैतत्पाल्यते देवि त्वमत्स्यंते च सर्वदा ॥ विसृष्टौ सृष्टिरूपा
त्वं स्थितिरूपा च पालने ॥ ५६ ॥ तथा संहृतिरूपान्ते जगतोस्य जगन्मये ॥
महाविद्या महामाया महामेधा महास्मृतिः ॥ ५७ ॥ महामोहा च भवती म
हादेवी महासुरी ॥ प्रकृतिस्त्वं च सर्वस्य गुणत्रय विभाविनी ॥ ५८ ॥ काल



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

रात्रिमहारात्रिर्मोहरात्रिश्चदारुणा ॥ त्वंश्रीस्त्वमीश्वरीत्वंह्रीस्त्वंबुद्धि
र्बोधिलक्षणा ॥ ५९ ॥ लज्जापुष्टिस्तथातुष्टिस्त्वंशान्तिक्षान्तिरेवच ॥
खड्गिनीशूलिनीघोरागदिनीचक्रिणीतथा ॥ ६० ॥ शंखिनीचापिनीबा
णभुशुंडीपरिघायुधा ॥ सौम्यासौम्यतराशेषसौम्येभ्यस्त्वतिसुंदरी ६१
परापराणांपरमात्वमेवपरमेश्वरी ॥ यच्चकिंचि[illegible]क्वचिद्वस्तुसदसद्वा ॥
खिलात्मिके ॥ ६२ ॥ तस्यसर्वस्ययाशक्तिःसात्वंकिंस्तूयसेतदा ॥

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

म० श्री ॥ ८ ॥

ययात्वयाजगत्स्त्रष्टाजगत्पात्यत्तियोजगत् ॥ ५९ ॥ सोपिनिद्रावशंनी
तंकस्त्वांस्तोतुमिहेश्वरः ॥ विष्णुःशरीरग्रहणमहमीशानएवच ॥ ६० ॥
कारितास्तेयतोतस्त्वांकःस्तोतुंशक्तिमान्भवेत् ॥ सात्वमित्थंप्रभावैः
स्वैरुदारैर्देविसंस्तुता ॥ ६१ ॥ मोहयैतौदुराधर्षावसुरौमधुकैटभौ ॥
प्रबोधंचजगत्स्वामीनीयतामच्युतोलघु ॥ ६२ ॥ बोधश्चक्रियतामस्य
हन्तुमेतौमहासुरौ ॥ ६३ ऋषिरुवाच ॥ एवंस्तुतातदादेवीतामसीतत्रवेधसा ६८

रामः ॥ ८ ॥

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

विष्णोःप्रबोधनार्थायनिहंतुंमधुकैटभौ ॥ नेत्रास्यनासिकावाहु
हृदयेभ्यस्तथोरसः ॥६९॥ निर्गम्यदर्शनेतस्थौब्रह्मणोव्यक्तजन्मनः
उत्तस्थौचजगन्नाथस्तयामुक्तोजनार्द्दनः ॥७०॥ एकार्णवेहिशय
नात्ततःसददृशेचतौ ॥ मधुकैटभौदुरात्मानावतिवीर्य्यपराक्रमौ
॥७१॥ क्रोधरक्तेक्षणावत्तुंब्रह्माणंजनितोद्यमौ ॥ समुत्थायतत
स्ताभ्यांयुयुधेभगवान्हरिः ॥७२॥ पंचवर्षसहस्राणिवाहुप्रहर

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



रीरो विभुः ॥ तावप्यतिबलोन्मत्तौ महामायाविमोहितौ ॥ ७३ ॥ उक्त
वन्तौ वरोऽस्मत्तो व्रियतामिति केशव ॥ भगवानुवाच ॥ भवेतामद्य मे
तुष्टौ मम वध्यावुभावपि ॥ ७४ ॥ किमन्येन वरेणात्र एतावद्धि वृतं मया
ऋषिरुवाच ॥ वंचिताभ्यामिति तदा सर्वमापोमयं जगत् ॥ ७५ ॥ वि
लोक्य ताभ्यां गदितो भगवान् कमलेक्षणः ॥ आवां जहि न यत्रो
र्वी सलिलेन परिप्लुता ॥ ७६ ॥ ऋषिरुवाच ॥ तथेत्युक्त्वा भगवता

प्रीतौ स्वस्तव युद्धेन श्लाघ्यस्त्वं मृत्युरावयोः ॥ ७६ ॥



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

ङ्खचक्रगदाभृता ॥ कृत्वा चक्रेण वै छिन्ने जघने शिरसी तयोः ॥ ७७ ॥
एवमेषा समुत्पन्ना ब्रह्मणा संस्तुता स्वयं ॥ प्रभावमस्या देव्यास्तु भू-
यः शृणु वदामि ते ॥ ७८ ॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे
देवीमाहात्म्ये मधुकैटभवधः ॥ १ ॥ ॐ अस्य श्री सप्तशतीस्तोत्रमंत्र-
स्य मध्यमचरित्रस्य विष्णुऋषिः उष्णिकछंदो महालक्ष्मीदेवता अद्रि-
जा बीजं वायुस्तत्वं महालक्ष्मीप्रीत्यर्थे पाठे विनियोगः ॥ ॐ विष्णवे स्त

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



र्षयेनमः शिरसि ॥ उष्णिक्छंदसेनमोमुखे ॥ महालक्ष्मीदेवता
यैनमोहृदि ॥ श्रींबीजायनमोगुह्ये ॥ वायुस्तत्त्वायनमस्तनयो
ध्यानम् ॥ अक्षस्रक्परशूगदेषुकुलिशंपद्मंधनुःकुण्डिकांदण्डंशक्तिम
सिंचर्मजलजंघंटांसुराभाजनं ॥ शूलंपाशसुदर्शनेचदधतींहस्तैःप्र
वालप्रभांसेवेसैरिभमर्दिनीमिहमहालक्ष्मींसरोजस्थिताम् ॥ ऋषि
रुवाच ॥ देवासुरमभूद्युद्धंपूर्णमब्दशतंपुरा ॥ महिषेसुराणामधिपेदे



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

वानां च पुरंदरे ॥ १ ॥ तत्रासुरैर्महावीर्यैर्देवसैन्यं पराजितं ॥ जित्वा च सकला
न्देवानिन्द्रोभून्महिषासुरः ॥ २ ॥ ततः पराजिता देवाः पद्मयोनिं प्रजापतिं ॥
पुरस्कृत्य गतास्तत्र यत्रेशगरुडध्वजौ ॥ ३ ॥ यथावृत्तं तयोस्तद्वन्महिषा
सुरचेष्टितं ॥ त्रिदशाः कथयामासुर्देवाभिभवविस्तरं ॥ ४ ॥ सूर्येन्द्राग्न्य
निलेन्दूनां यमस्य वरुणस्य च ॥ अन्येषां चाधिकारान्स स्वयमेवाधितिष्ठ
ति ॥ ५ ॥ स्वर्गान्निराकृताः सर्वे तेन देवा गणा भुवि ॥ विचरन्ति यथा मर्त्या

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



महिषेणदुरात्मना ॥ ६ ॥ एतद्वः कथितं सर्वममरारिविचेष्टितं ॥ शरणं
वः प्रपन्नाः स्मो वधस्तस्य विचिन्त्यतां ॥ ७ ॥ इत्थं निशम्य देवानां वचांसि मधुसू
दन ॥ चकार कोपं शम्भुश्च भ्रुकुटीकुटिलाननौ ॥ ८ ॥ ततोतिकोपपूर्णस्य
चक्रिणो वदनात्ततः ॥ निश्चक्राम महत्तेजो ब्रह्मणः शंकरस्य च ॥ ९ ॥
अन्येषां चैव देवानां शक्रादीनां शरीरतः ॥ निर्गतं सुमहत्तेजस्तच्चैक्यं
समगच्छत ।अतीव तेजसः कूटं ज्वलन्तमिव पर्वतं ॥ ददृशुस्ते सुरास्तत्र
।१०।



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

ज्वालाव्याप्तदिगंतरं ॥११॥ अतुलंतत्र तत्तेजः सर्वदेवशरीरजं ॥ एकस्थंत
दभून्नारीव्याप्तलोकत्रयंत्विषा ॥१२॥ यदभूच्छांभवंतेजस्तेनाजायततं
मुखं ॥ याम्येनचाभवन्केशाबाहवोविष्णुतेजसा ॥१३॥ सौम्येनस्तन
योर्युग्मंमध्यंचैन्द्रेणचाभवत् ॥ वारुणेनचजंघोरूनितंबस्तेजसाभुवः ॥
॥१४॥ ब्रह्मणस्तेजसापादौतदंगुल्योर्कतेजसा ॥ वसूनांचकरांगुल्यः ॥
कौबेरेणचनासिका ॥१५॥ तस्यास्तुदन्ताःसंभूताःप्राजापत्येनतेजसा·

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

श्री

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

स. श.

॥ १३ ॥

नयनत्रितयं जज्ञे तथा पावकतेजसा ॥ १६ ॥ भ्रुवौ च संध्ययोस्तेजः श्रवणावनिलस्य च ॥
अन्येषां चैव देवानां संभवस्तेजसां शिवा ॥ १७ ॥ ततः समस्तदेवानां तेजोराशिसमुद्भवां ॥ तां
विलोक्य मुदं प्रापुरमरा महिषार्दिताः ॥ १८ ॥ शूलं शूलाद्विनिःकृष्य ददौ तस्यै पिनाकधृ
क् ॥ चक्रं च दत्तवान्कृष्णः समुत्पाद्य स्वचक्रतः ॥ १९ ॥ शंखं च वरुणः शक्तिं ददौ तस्यै
हुताशनः ॥ मारुतो दत्तवांश्चापं बाणपूर्णे तथेषुधी ॥ २० ॥ वज्रमिन्द्रः समुत्पाद्य कु
लिशादमराधिपः ॥ ददौ तस्यै सहस्राक्षो घण्टामैरावताद्गजात् ॥ २१ ॥ कालदण्डा

एम:

॥ १३ ॥

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

द्यमोदण्डं पाशञ्चाम्बुपतिर्द्ददौ ॥ प्रजापतिश्चाक्षमालां ददौ ब्रह्मा कमण्डलुं ॥
समस्तरोमकूपेषु निजरश्मीन्दिवाकरः ॥ कालश्च दत्तवान्खड्गं तस्याश्चर्म्म च निर्म्म
दे २ लं ॥ २३ ॥ क्षीरोदश्चामलं हारमजरे च तथाम्बरे ॥ चूडामणिं तथा दिव्यं कुण्डले कट
कानि च ॥ २४ ॥ अर्द्धचन्द्रं तथा शुभ्रं केयूरान्सर्व्वबाहुषु ॥ नूपुरौ विमलौ तद्व
द्ग्रैवेयकमनुत्तमं ॥ २५ ॥ अङ्गुलीयकरत्नानि समस्तास्वङ्गुलीषु च ॥ विश्व
कर्म्मा ददौ तस्यै परशुं चातिनिर्मलं ॥ २६ ॥ अस्त्राण्यनेकरूपाणि तथाभेद्यं

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

स० दु

॥१४॥

चदंशते ॥ अम्लानपंकजां मालां शिरस्युरसि चापरान् ॥ २७ ॥ अददज्ज
लधिस्तस्मै पंकजं चातिशोभनं ॥ हिमवान्वाहनं सिंहं रत्नानि विविधानि च
॥ २८ ॥ ददावशून्यं सुरया पानपात्रं धनाधिपः ॥ शेषश्च सर्वनागेशो महाम
णिविभूषितं ॥ २९ ॥ नागहारं ददौ तस्यै धत्ते यः पृथिवीमिमां ॥ अन्यैरपिसु
रैर्देवी भूषणैरायुधैस्तथा ॥ ३० ॥ सम्मानिता ननादोच्चैः साट्टहासं मुहुर्मुहुः ॥
तस्या नादेन घोरेण कृत्स्नमापूरितं नभः ॥ ३१ ॥ अमायतातिमहता प्रतिश

एम्सः

॥१४॥

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

द्दो महानभूत् ॥ चुक्षुभुः सकला लोकाः समुद्राश्च चकंपिरे ॥ ३२ ॥ चचा
ल्लवसुधा चेलुः सकलाश्च महीधराः ॥ जयेति देवाश्च मुदा तामूचुः सिंहवा
हिनीं ॥ ३३ ॥ तुष्टुवुर्मुनयश्चैनां भक्तिनम्रात्ममूर्त्तयः ॥ दृष्ट्वा समस्तं संक्षु
ब्धं त्रैलोक्यममरारयः ॥ ३४ ॥ सन्नद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधाः
आः किमेतदिति क्रोधादाभाष्य महिषासुरः ॥ ३५ ॥ अभ्यधावततं शब्दम
शेषैरसुरैर्वृतः ॥ स ददर्श ततो देवीं व्याप्तलोकत्रयां त्विषा ॥ ३६ ॥ पादाक्रां

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



त्यानतभुवं किरीटोल्लिखितांबरां ॥ क्षोभिताशेषपातालां धनुर्ज्यानिःस्वनेन
ताम् ॥ ३७ ॥ दिशो भुजसहस्रेण समंताद्व्याप्य संस्थिताम् ॥ ततः प्रववृते तयु
द्धं तया देव्या सुरद्विषां ॥ ३८ ॥ शस्त्रास्त्रैर्बहुधा मुक्तै रादीपितदिगंतरं ॥ महि
षासुरसेनानीश्चिक्षुराख्यो महासुरः ॥ ३९ ॥ युयुधे चामरश्चान्यैश्चतुरंगब
लान्वितैः ॥ रथानामयुतैः षड्भिरुदग्राख्यो महासुरः ॥ ४० ॥ अयुध्यतायुता
नां च सहस्रेण महाहनुः ॥ पंचाशद्भिश्च नियुतैरसिलोमा महासुरः ॥ ४१ ॥ अ



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

युतानां कोटिः अड्डिर्वाव्ष्कलो युयुधेरामे ॥ गजवाजिसहस्रौघै कैः परिवारि
तः ॥ ४२ ॥ हतोरथानां कोट्याचयुद्धे तस्मिन्नयुध्यतः ॥ विडालाक्षोपयुतानां
च पंचाशत् कोट्ड्रिरथायुतैः ॥ ४३ ॥ युयुधे संयुगे तत्र रथानां परिवारितः ॥ अन्यैव
तत्रायुत केशरथनागहयैर्बृर्थी ॥ ४४ ॥ युयुधुः संयुगे देव्या [illegible]
कोटिकोटिसहस्रैस्तु रथानां दन्तिनां तथा ॥ ४५ ॥ हयानां च वृतो युद्धे तत्राभून्म
हिषासुरः ॥ तोमरैर्भिन्दिपालैश्च शक्तिभिर्मुशलैस्तथा ॥ ४६ ॥ युयुधुः संयु

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

गेदेव्याः खड्गैः परशु पट्टिशैः ॥ केचिच्च चिक्षिपुः शूलं केचित्पाशांस्तथापरे
॥ ४७ ॥ देवीं खड्गप्रहारैस्तु ते तां हन्तुं प्रचक्रमुः ॥ सापि देवी ततस्तानि शस्त्राण्य
स्त्राणि चण्डिका ॥ ४८ ॥ लीलयैव प्रचिच्छेद निजशस्त्रास्त्रवर्षिणी ॥ अना
यस्तानना देवी स्तूयमाना सुरर्षिभिः ॥ ४९ ॥ मुमोचासुरदेहेषु शस्त्राण्यस्त्रा
णि चेश्वरी ॥ सोपि क्रुद्धो धुतसटो देव्या वाहनकेसरी ॥ ५० ॥ चचारासुरसै
न्येषु वनेष्विव हुताशनः ॥ निःश्वासान्मुमुचे यांश्च युद्ध्यमाना रणेम्बिका ॥ ५१



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

तस्व सद्यः संभूता गणाः शतसहस्रशः ॥ युयुधुस्ते परशुभिर्भिंदिपालासिपट्टि
शैः ॥ ५२ ॥ नाशयन्तोऽसुरगणान्देवीशक्त्युपबृंहिताः ॥ अवादयन्तः पट
हान्गणाः शंखांस्तथापरे ॥ ५३ ॥ मृदंगांश्च तथैवान्ये तस्मिन्युद्धमहोत्सवे
ततो देवी त्रिशूलेन गदया शक्तिवृष्टिभिः ॥ ५४ ॥ खड्गादिभिश्च शतशो
निजघान महासुरान् ॥ पातयामास चैवान्यान्घंटास्वनविमोहितान् ॥
॥ ५५ ॥ असुरान्भुविपाशेन बद्ध्वा चान्यानकर्षयत् ॥ केचिद्द्विधा कृतास्ती

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

स॰ श॰
॥१८॥

क्षौणैः खड्गपातैस्तथापरे ॥ ५६ ॥ विपोथिता निपातेन गदया भुवि शेरते ॥ वे
गस्थ केचिद्रुधिरं मुशलेन भृशं हता ॥ ५७ ॥ केचिन्निपतिता भूमौ भिन्नाः शू
लेन वक्षसि ॥ निरन्तराः शरौघेण गाढं कृताः केचिद्रणाजिरे ॥ ५८ ॥ श्येनानु
कारिणः प्राणान्मुमुचुस्त्रिदशार्दनाः ॥ केषांचिद्बाहवश्छिन्नाश्छिन्न
ग्रीवास्तथापरे ॥ ५९ ॥ शिरांसि पेतुरन्येषामन्ये मध्ये विदारिताः ॥ विच्छि
न्नजंघास्त्वपरे पेतुरुर्व्यां महासुराः ॥ एकबाह्वक्षिचरणाः केचिद्देव्या द्विधा

एम॰
॥१९॥

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

क्षताः ॥ छिन्नेपि चान्ये शिरसि पतिताः पुनरुत्थिताः ॥ ६१ ॥ कवन्धा युयुधु
र्दैत्या गृहीतपरमायुधाः ॥ ननृतुश्चापरे तत्र युद्धे तूर्यलयाश्रिताः ॥ ६२ ॥
कवंधाश्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः ॥ तिष्ठ तिष्ठेति भाषंतो दे
वीमन्ये महासुराः ॥ ६३ ॥ पातितै रथनागाश्वै रक्तैश्च वसुंधरा ॥ अगम्या
साभवत्तत्र यत्राभूत्स महारणः ॥ ६४ ॥ शोणितौघा महानद्यः सद्यस्तत्र प्र
सुस्रुवुः ॥ मध्ये चासुरसैन्यस्य वारणासुरवाजिनाम् ॥ ६५ ॥ क्षणेन तन्महा

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

स॰ ३ए॰

॥ १८ ॥

सैन्यमसुराणांतथांबिका ॥ निन्येक्षयंयथावह्निस्तृणदारुमहाचयं ॥ ६६ ॥
सचसिंहोमहानादमुत्सृजन्धुतकेसरः ॥ शरीरेभ्योमरारीणामसूनिवविचि
न्वति ॥ ६७ ॥ देव्यागणैश्चतैस्तत्रकृतंयुद्धंतथासुरैः ॥ यथैषांतुतुषुर्देवाःपुष्प
वृष्टिमुचोदिवि ॥ ६८ ॥ इतिमार्कण्डेयपुराणेसावर्णिकेमन्वन्तरेदेवीमा
हात्म्येमहिषासुरसैन्यवधः ॥ २ ॥ ऋषिरुवाच ॥ निहन्यमानंतत्सैन्यम
वलोक्यमहासुरः ॥ सेनानीश्चिक्षुरःकोपाद्ययौयोद्धुमथाम्बिकां ॥ २ ॥ सदे

[illegible]

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

॥ १८ ॥

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

विंशारवर्षैरगाववर्षस्समोसुरः॥ यथामेघगिरेः शृंगंतोयवर्षेणतोयद॥२॥
तस्यछित्वाततोदेवीलीलयैवशरोत्करान्॥ जघानतुरगान्वाणेर्यंतारं
चैववाजिनां॥३॥ चिक्षेपधनुःसद्योध्वजंचातिसमुछ्रितं॥ विव्याधचैव
गात्रेषुछिन्नधन्वानमाशुगैः॥४॥ सछिन्नधन्वाविरथोहताश्वोहतसार
थिः॥ अभ्यधावततांदेवीखड्गचर्म्मधरोसुरः॥५॥ सिंहमाहत्यखड्गेनती
क्ष्णधारेणमूर्द्धनि॥ आजघानभुजेसव्येदेवीमप्यतिवेगवान्॥६॥ तस्य

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



ःरवक्रोभजंत्राप्य पफानृपनंदन ॥ ततोजगामाहृच्छूलंसकोपाद्धरलोचन
॥७॥ विक्षेपचततत्तुभद्रकाल्यांमहासुरः ॥ जाज्वल्यमानंतेजोभिरवि
बिम्बमिमाम्बरात ॥८॥ दृष्ट्वातदापतच्छूलंदेवीशूलममुंचत ॥ तच्छूलंशतधा
तेननीतंसूवमहासुरः ॥९॥ हतेतस्मिन्महावीर्ये महिषस्यचमूपतौ ॥ आज
गामगजारूढश्चामरस्त्रिदशार्दनः ॥१०॥ सोपिशक्तिंमुमोचाथदेव्यास्ता
मंविकाद्रुतं ॥ हुंकाराभिहतांभूमौपातयामासनिःप्रभां ॥११॥ भग्नांशक्ति



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

क्षौंनिपतितां हत्वा क्रोधसमन्वितः ॥ विक्षेपचामरः शूलं वाणोस्तदपिसा
छिन्नत॥१२॥ ततःसिंहःसमुत्पत्य गजकुंभान्तरेस्थितः ॥ वाहुयुद्धेनयुयु
धेतेनोच्चैस्त्रीदशारिणा॥१३॥ युध्यमानौततस्तौतुतस्मान्नागान्महींगतौ
युयुधातेतिसंरब्धौप्रहारैरतिदारुणैः॥१४॥ ततोवेगात्खमुत्पत्य
निपत्यचमृगारिणा॥ करप्रहारेणशिरश्चामरस्यपृथक्कृतं॥१५
उदग्रश्चरणेदेव्याशिलावृक्षादिभिर्हतः॥ दन्तमुष्टितलैश्चैवक

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

स० श रालश्चनिपातितः॥ १६ देवीक्रुद्धागदापातैश्चूर्णयामासचोद्धतं॥ वाष्क
लंभिन्दिपालेनवाणैस्ताम्रंतथान्धकं॥ १७ ॥ उग्रास्यमुग्रवीर्यंचतथैवचम
॥ २०॥ हाहनुम्॥ त्रिनेत्राचत्रिशूलेनजघानपरमेश्वरी॥ १८ ॥ विडालस्यासि
नाकायात्पातयामासवैशिरः॥ दुर्द्धरंदुर्मुखंचोभौशरैर्निन्येयमक्षयं॥ १९
एवंसंक्षीयमाणेतुस्वसैन्येमहिषासुरः॥ माहिषेणस्वरूपेणत्रासयामा
सतान्गणान्॥ २० ॥ कांश्चित्तुण्डप्रहारेणखुरक्षेपैस्तथापरान्॥ लाङ्गू ॥ २०॥

रामः

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

ल्लताडितांश्चान्यान्शृंगाभ्यां च विदारितान् ॥ २१ ॥ वेगेन कांश्चिदपरा
न्नादेन भ्रमणेन च ॥ निश्वासपवनेनान्यान्पातयामास भूतले ॥ २२ ॥ नि
पात्य प्रमथानीकमभ्यधावत मासुरः ॥ सिंहं हंतुं महादेव्याः कोपं चक्रे
ततोम्बिका ॥ २३ ॥ सोपि कोपान्महावीर्यः खुरक्षुण्णमहीतलः ॥ शृंगा
भ्यां पर्वतानुच्चांश्चिक्षेप च ननाद च ॥ २४ ॥ वेगभ्रमणविक्षुण्णा मही त
स्य व्यशीर्यत ॥ लांगूलेनाहतश्चाब्धिः प्लावयामास सर्वतः ॥ २५ ॥ धुत

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

स·च·
॥२०॥

शृंगविभिन्नाश्च खंडखंडं ययुर्घना ॥ श्वासानिलास्ताः शतशो निपेतुर्न
भसोचला॥ २६॥ इतिक्रोधसमाध्मातमापतन्तं महासुरम्·॥ दृष्ट्वा साचं
डिका कोपं तद्वधाय तदाकरोत्॥ २७॥ साक्षिप्त्वा तस्य वै पाशं तं बबन्ध महासु
रं॥ तत्याज माहिषं रूपं सोपि बद्धो महामृधे॥ २८॥ ततः सिंहोभवत्सद्यो
यावत्तस्याम्बिका शिरः॥ छिनत्ति तावत्पुरुषः खड्गपाणिरदृश्यत॥ २९॥ ततः
एवाशु पुरुषं देवि चिच्छेद सायकैः॥ तं खड्गचर्म्मणा सार्धं ततः सोभून्महागजः

३
एमः
॥२०॥

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

कोरागवमहास्मिहं तंवकर्षजगर्ज्जीव ॥ कर्वतास्त्रकादेवीरवंकेननिहंतत· ३२
ततोमहासुरोभूयोमाहिषंवपुरास्थितः ॥ नष्टैवक्षोभयामासत्रैलोक्यं
सचराचरम् ॥ ३३ ॥ ततःक्रुद्धाजगन्माताचण्डिकापानमुत्तमं ॥ पपौपुनःपु
नश्चैवजहासारुणलोचना ॥ ३४ ॥ ननर्द्दचासुरःसोपिबलवीर्य्यमदोद्धतः ॥
विषाणाभ्यांचविक्षेपचण्डिकांप्रतिभूधरान् ॥ ३५ ॥ साचतान्प्रहितांस्तेन
चूर्णयन्तीशरोत्करैः ॥ उवाचतंमदोद्धूतमुखरागाकुलाक्षरं ॥ ३६ ॥ देव्युवाच· ५८ ॥

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

स० श्रा·

॥ २२ ॥

[illegible] पादेनाक्रम्य कण्ठे च शूलेनैनमताड
यत् ३९

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

गर्ज्ज गर्ज्ज क्षणं मूढ मधु यावत् पिबाम्यहं ॥ मया त्वयि हतेऽत्रैव गर्ज्जिष्यन्त्याशु दे
वताः ॥ ३८ ॥ ततः सोपि पदाक्रान्तस्तया निजमुखात्ततः ॥ अर्द्धनिष्क्रान्त एवाति
देव्या वीर्य्येण संवृतः ॥ ४० ॥ अर्द्धनिष्क्रान्त एवासौ युध्यमानो महासुरः ॥ तया म
हासिना देव्या शिरश्छित्वा निपातितः ॥ ४१ ॥ ततो हाहाकृतं सर्वं दैत्यसैन्यं ननाश
तत् ॥ प्रहर्षं च परं जग्मुः सकला देवतागणाः ॥ ४२ ॥ तुष्टुवुस्तां सुरा देवीं सह दि
व्यैर्महर्षिभिः ॥ जगुर्गन्धर्वपतयो ननृतुश्चाप्सरोगणाः ॥ ४३ ॥ इति मार्कण्डेयपुराणे

रामः

॥ २२ ॥

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

[illegible]

सावर्णिके मन्वंतरे देवीमाहात्म्ये महिषासुरवधः ॥ ३ ॥ ॐ ऋषिरुवाच ॥ शक्रादयः
सुरगणानिहतेऽतिवीर्ये तस्मिन्दुरात्मनि सुरारिबले च देव्या ॥ तां तुष्टुवुः प्र
णतिनम्रशिरोधरांसावाग्भिः प्रहर्षपुलकोद्गमचारुदेहा ॥ १ ॥ देव्या
यया ततमिदं जगदात्मशक्त्या निःशेषदेवगणशक्तिसमूहमूर्त्या ॥ ताम
म्बिकामखिलदेवमहर्षिपूज्यां भक्त्या नताः स्म विदधातु शुभानि सा नः ॥ २ ॥
यस्याः प्रभावमतुलं भगवाननन्तो ब्रह्मा हरश्च न हि वक्तुमलं बलं च ॥ सा च

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



ण्डिकाखिलजगत्परिपालनाय नाशाय चाशुभभयस्य मतिं करोतु ॥ ४ ॥ या श्रीः
स्वयं सुकृतिनां भवनेष्वलक्ष्मीः पापात्मनां कृतधियां हृदयेषु बुद्धिः ॥ श्रद्धा सतां कु
लजनप्रभवस्य लज्जा तां त्वां नताः स्म परिपालय देवि विश्वं ॥ ५ ॥ किं वर्णयाम तव
रूपमचिन्त्यमेतत् किं चातिवीर्यमसुरक्षयकारि भूरि ॥ किं चाहवेषु चरितानि तवाद्भुता
नि सर्वेषु देव्यसुरदेवगणादिकेषु ॥ ६ ॥ हेतुः समस्तजगतां त्रिगुणापि दोषैर्न ज्ञा
यसे हरिहरादिभिरप्यपारा ॥ सर्वाश्रयाखिलमिदं जगदंशभूतमव्याकृता हि परमा प्र



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

ध्कृतिस्त्वमाद्या ॥७॥ यस्याः समस्तसुरता समुदीरणेन तृप्तिं प्रयाति सकलेषु मखेषु
देवि ॥ स्वाहासि वै पितृगणस्य च तृप्तिहेतुरुच्चार्यसे त्वमत एव जनैः स्वधा च ॥ ८ ॥ या मु
क्तिहेतुरविचिंत्यमहाव्रता त्वमभ्यस्यसे सुनियतेन्द्रियतत्वसारैः ॥ मोक्षार्थिभिर्मुनिभिरस्त
समस्तदोषैर्विद्यासि सा भगवती परमा हि देवी ॥ ९ ॥ शब्दात्मिका सुविमलर्ग्यजुषां निधानमु
द्गीथरम्यपदपाठवतां च साम्नां ॥ देवी त्रयी भगवती भवभावनाय वार्तासि सर्वजग
तां परमार्तिहं त्री ॥ १० ॥ मेधासि देवि विदिताखिलशास्त्रसारा दुर्गासि दुर्गभव

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

स·श·
॥२४॥

सागरनौरसंगा ॥ श्रीःकैटभारिहृदयैककृताधिवासा गौरी त्वमेव शशिमौलिकृतप्र
तिष्ठा ॥ ११ ॥ ईषत्सहासममलं परिपूर्णचन्द्रबिंबानुकारि कनकोत्तमकान्तिकान्तं
अत्यद्भुतं प्रहृतमात्तरुषा तथापि वक्त्रं विलोक्य सहसा महिषासुरेण ॥ १२ ॥ दृष्ट्वा तु
देवि कुपितं भ्रुकुटीकरालमुद्यच्छशाङ्कसदृशच्छवि यन्न सद्यः ॥ प्राणान्मुमोच महिषस्त
दतीव चित्रं कैर्जीव्यते हि कुपितान्तकदर्शनेन ॥ १३ ॥ देवि प्रसीद परमा भवती भवाय
सद्यो विनाशयसि कोपवती कुलानि ॥ विज्ञातमेतदधुनैव यदस्तमेतंनीतं बलं सुविपुलं

रामः
॥२५॥

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

माहिष्यासुरस्य॥१४॥ तेसम्मताजनपदेषुधनानितेषांतेषांयशांसिनचसीदतिध
र्म्मवर्गः॥ धन्यास्तएवनिभृतात्मजभृत्यदारायेषांसदाभ्युदयदाभवतीप्रसन्ना॥१५
धर्म्याणिदेविसकलानिसदैवकर्म्माण्यत्यादृतःप्रतिदिनंसुकृतीकरोति॥ स्वर्गंप्र
यातिचततोभवतीप्रसादाल्लोकत्रयेपिफलदाननुदेवितेन॥ १६॥ दुर्गेस्मृताह
रसिभीतिमशेषजन्तोःस्वस्थैःस्मृतामतिमतीवशुभांददासि॥ दारिद्र्यदुःखभयहा
रिणिकात्वदन्यासर्वोपकारकरणायसदार्द्रचित्ता॥१७॥ एभिर्हतैर्जगदुपैति

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



सुखंतथैतेकुर्वंतुनामनरकायचिरायपापं ॥ संग्राममृत्युमधिगम्यदिवंप्रयान्तुम
त्वेतिनूनमहितान्विनिहंसिदेवि ॥ १८ ॥ दृष्ट्वैवकिंनभवतीप्रकरोतिभस्मसर्वासु
रानरिषुयत्प्रहिणोषिशस्त्रं ॥ ॥ लोकान्प्रयान्तुरिपवोपिहिशस्त्रपूताइत्थंमतिर्भवति
तेष्वहितेषुसाध्वी ॥ १९ ॥ खड्गप्रभानिकरविस्फुरणैस्तथोग्रैःशूलाग्रकान्तिनिवहे
नदृशोसुराणां ॥ यन्नागताविलयमंशुमदिन्दुखण्डयोग्याननंतवविलोकयतांतदेत
त् ॥ २० ॥ दुर्वृत्तवृत्तशमनंतवदेविशीलंरूपंतथैतदविचिन्त्यमतुल्यमन्यैः ॥ वीर्यंचहंतृ



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

हृतदेवपराक्रमाणांवैरिष्वपिप्रकटितैवदयात्वयेत्थं॥२१॥केनोपमाभवतु
तेस्यपराक्रमस्यरूपंचशत्रुभयकार्यतिहारिकुत्र॥चित्तेकृपासमरनिष्ठुरताच
दृष्टात्वय्येवदेविवरदेभुवनत्रयेपि॥२२॥त्रैलोक्यमेतदखिलंरिपुनाशने
नत्रातंत्वयासमरमूर्द्धनितेपिहत्वा॥नीतादिवंरिपुगणाभयमप्यपास्तम
स्माकमुन्मदसुरारिभवन्नमस्ते॥२३॥शूलेनपाहिनोदेविपाहिखड्गेनचा
म्बिके॥घण्टास्वनेननःपाहिचापज्यानिस्वनेनच॥२४॥प्राच्यांरक्षप्रतीच्यांच

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



चण्डिके रक्ष दक्षिणे ॥ भ्रामणेनात्मशूलस्योत्तरस्यां तथेश्वरि ॥२५॥ सौम्या
नि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ॥ यानि चात्यंतघोराणि तै रक्षास्मांस्तथा भु
वम् ॥२६॥ खड्गशूलगदादीनि यानि चास्त्राणि तेम्बिके ॥ करपल्लवसंगीनि
तैरस्मान् रक्ष सर्वतः ॥२७॥ ऋषिरुवाच ॥ एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नन्दनोद्भवैः
अर्चिता जगतां धात्री तथा गन्धानुलेपनैः ॥२८॥ भक्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपै
स्तु धूपिता ॥ प्राह प्रसादसुमुखी समस्तान् प्रणतान् सुरान् ॥२९॥ देव्युवाच ॥ व्रियतां



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

३२ ३३
त्रिदशाः सर्वे यदस्मत्तोऽभिवांछितं ॥ देवा ऊचुः ॥ भगवत्या कृतं सर्वं न किंचिद
वशिष्यते ॥ यदयं निहतः शत्रुरस्माकं महिषासुरः ॥ ३४ ॥ यदि चापि वरो देय
स्त्वयास्माकं महेश्वरि ॥ संस्मृता संस्मृता त्वं नो हिंसेथाः परमापदः ॥ ३५ ॥ यश्च
मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने ॥ तस्य वित्तर्द्धिविभवैर्धनदारादिसंप
दां ॥ ३६ ॥ वृद्धयेऽस्मत्प्रसन्ना त्वं भवेथाः सर्वदांबिके ॥ ऋषिरुवाच ॥ इति प्र
सादिता देवैर्जगतोऽर्थे तथात्मनः ॥ तथेत्युक्त्वा भद्रकाली बभूवान्तर्हिता नृप ॥ ३७ ॥

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



इत्येतत्कथितं भूप संभूता सा यथा पुरा ॥ देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी
॥४०॥ पुनश्च गौरीदेहात्सा समुद्भूता यथाभवत् ॥ वधाय दुष्टदैत्यानां तथा शुम्भनिशु
म्भयोः ॥४१॥ रक्षणाय च लोकानां देवानामुपकारिणी ॥ तच्छृणुष्व मयाख्यातं य
थावत्कथयामि ते ॥ ४२ ॥ इति मार्कण्डेयपुराणे सावर्णिके मन्वंतरे देवीमाहा
त्म्ये शक्रादिस्तुतिः ॥ ४ ॥ ॐ अस्य श्रीभगवतीस्तोत्रमंत्रस्योत्तरचरित्रस्य रुद्र
ऋषिस्त्रिष्टुप्छन्दो महासरस्वती देवता कामो बीजं विस्तत्वं श्रीमहासरस्वतीप्रीत



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

येपाठेविनियोगः ॥ ॐ ऐं श्रीं कामाक्षायैनमः शिरसि ॥ त्रिष्टुप्छंदसेनमोमुखे
महासरस्वतीदेवतायैनमोहृदि ॥ कामबीजायनमोगुह्ये ॥ रविततत्त्वायनमःस्त
नयोःध्यानम् ॥ घंटाशूलहलानिशंखमुसलेचक्रंधनुःसायकंहस्ताब्जैर्दध
तींघनान्तविलसच्छीतांशुतुल्यप्रभाम् ॥ गौरीदेहसमुद्भवांत्रिजगतामा
धारभूतांमहापूर्वामत्रसरस्वतीमनुभजेशुंभादिदैत्यार्दिनीम् ॥ ऋषिरुवाच ॥ १ ॥
पुराशुंभनिशुंभाभ्यामसुराभ्यांशचीपतेः ॥ त्रैलोक्यंयज्ञभागाश्चहृतामदबलाश्र

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

स॰ श॰
॥२८॥

यात् ॥ २ ॥ तावेवसूर्य्यतांतद्वदधिकारंतथैन्दवं ॥ कौवेरमथयाम्यंचचक्रा
तेवरुणस्यच ॥ ३ ॥ तावेवपवनर्द्धिंचचक्रतुर्वह्निकर्म्मच ॥ ततोदेवाविनिर्द्धू
ताभ्रष्टराज्यापराजिताः ॥ ४ ॥ हृताधिकारास्त्रिदशास्ताभ्यांसर्व्वेनिराकृताः ॥
महासुराभ्यांतांदेवींसंस्मरंत्यपराजितां ॥ ५ ॥ तयास्माकंवरोदत्तोयथापत्सु
स्मृताखिलाः ॥ भवतांनाशयिष्यामितत्क्षणात्परमापदः ॥ ६ ॥ इतिकृत्वामतिं
देवाहिमवंतंनगेश्वरं ॥ जग्मुस्तत्रततोदेवींविष्णुमायांप्रतुष्टुवुः ॥ ७ ॥ देवाऊचुः ॥ ८ ॥

रामः
॥२८॥

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः ॥ नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म
ताम् ॥ ८ ॥ रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः ॥ ज्योत्स्नायै चेन्दुरूपि
ण्यै सुखायै सततं नमः ॥ ९ ॥ कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कुर्म्यै नमो नमः ॥
नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ॥ १० ॥ दुर्गायै दुर्गपारायै सारायै
सर्वकारिण्यै ॥ ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥ ११ ॥ अतिसौम्यातिरौद्रायै
रौद्रायै नतास्तस्यै नमो नमः ॥ नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥ १२ ॥ या दे

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



वीसर्वभूतेषुविष्णुमायेतिशब्दिता ॥ नमस्तस्यै । नमस्तस्यै ॥ नमस्तस्यै ॥ नमोन
मः ॥ १३ ॥ यादेवीसर्वभूतेषुचेतनेत्यभिधीयते ॥ नमस्तस्यै ३ नमोनमः ॥ १४ ॥ या
देवीसर्वभूतेषुबुद्धिरूपेणसंस्थिता ॥ नमस्तस्यै ३ नमोनमः ॥ १५ ॥ यादेवी
सर्वभूतेषुनिद्रारूपेणसंस्थिता ॥ नमस्तस्यै ३ नमोनमः ॥ १६ ॥ यादेवीसर्वभू
तेषुक्षुधारूपेणसंस्थिता ॥ नमस्तस्यै ३ नमोनमः ॥ १७ ॥ यादेवीसर्वभूतेषुछा
यारूपेणसंस्थिता ॥ नमस्तस्यै ३ नमोनमः ॥ १८ ॥ यादेवीसर्वभूतेषुशान्तिरूपेणसं



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

नमस्तस्यै३ नमोनमः १८

स्थिता॰ यादेवी॰ तृष्णारूपेण संस्थिता ॥ नमस्तस्यै३ नमोनमः ॥ १९ ॥ यादेवी
क्षान्तिरूपेण संस्थिता ॥ नमस्तस्यै३ नमोनमः ॥ २० ॥ यादेवी जातिरूपेण सं
स्थिता ॥ नमस्तस्यै३ नमोनमः ॥ २१ ॥ यादेवी॰ लज्जारूपेण संस्थिता॰ नम
स्तस्यै३ नमोनमः ॥ २२ ॥ यादेवी॰ शान्तिरूपेण संस्थिता ॥ नमस्तस्यै३ नमोन
मः ॥ २३ ॥ यादेवी॰ श्रद्धारूपेण संस्थिता ॥ नमस्तस्यै३ नमोनमः ॥ २४ ॥
यादेवी सर्वभूतेषु कान्तिरूपेण संस्थिता ॥ नमस्तस्यै३ नमोनमः ॥ २५ ॥ यादेवी

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



लक्ष्मीरूपेण संस्थिता ॥ नमस्तस्यै३ नमोनमः ॥ २६ ॥ यादेवी० वृत्तिरूपेण संस्थि
ता० नमस्तस्यै३ नमोन्नमः ॥ २७ ॥ यादेवी० स्मृतिरूपेणपेण संस्थिता ॥ नमस्त
स्यै३ नमोनमः ॥ २८ ॥ यादेवी० दयारूपेण संस्थिता ॥ नमस्तस्यै३ नमोन्नमः २९
यादेवी० तुष्टिरूपेण संस्थिता ॥ नमस्तस्यै३ नमोन्नमः ॥ ३० ॥ यादेवी० मातृरू
पेण संस्थिता ॥ नमस्तस्यै३ नमोन्नमः ॥ ३१ ॥ यादेवी० भ्रान्तिरूपेण संस्थिता०
नमस्तस्यै३ नमोनमः ॥ ३२ ॥ इन्द्रियाणामधिष्ठात्री भूतानामखिलेषु



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

या ॥ भूतेषु सततन्तस्यै व्याप्तिदेव्यै नमोनमः ॥ ३३ ॥ चितिरूपेण या कृत्स्नमे
तद्व्याप्य स्थिता जगत् ॥ नमस्तस्यै ३ नमोनमः ॥ ३४ ॥ स्तुता सुरैः पूर्वमभीष्टसं
श्रयात्तथा सुरेन्द्रेण दिनेषु सेविता ॥ करोतु सा नः शुभहेतुरीश्वरी शुभानि भद्रा
ण्यभिहन्तु चापदः ॥ ३५ ॥ या साम्प्रतं चोद्धतदैत्यतापितैरस्माभिरीशा च सुरैर्नम
स्यते ॥ या च स्मृता तत्क्षणमेव हन्ति नः सर्वापदो भक्तिविनम्रमूर्त्तिभिः ॥ ३६ ॥ ऋषिरु
वाच ॥ एवं स्तवाभियुक्तानां देवानां तत्र पार्वती ॥ स्नातुमभ्याययौ तोये जाह्न



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



व्यानृपनंदन॥ साब्रवीत्तान्सुरान्सुभ्रूर्भवद्भिः स्तूयतेत्र का॥ शरीरकोशतश्चा
स्याः समुद्भूताब्रवीच्छिवा॥ ३८॥ स्तोत्रं ममैतत्क्रियते शुंभदैत्यनिराकृतैः॥ देवैः
समेतैः समरे निशुंभेन पराजितैः॥ ३९॥ शरीरकोशाद्यत्तस्याः पार्वत्या निःसृता
म्बिका॥ कौशिकीति समस्तेषु ततो लोकेषु गीयते॥ ४०॥ तस्यां विनिर्गता
यान्तु कृष्णाभूत्सापि पार्वती॥ कालिकेति समाख्याता हिमाचलकृताश्रया॥ ४१
ततोम्बिकां परं रूपं बिभ्राणां सुमनोहरम्॥ ददर्श चण्डो मुण्डश्च भृत्यौ शुंभनिशुंभ
॥ ४१ ॥



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

योः॥ ४२ ॥ ताभ्यांशुंभायचाख्याताताश्चतीवसुमनोहरा॥ काप्यास्तेस्त्रीमहा
राजभासयंतीहिमाचलं॥ ४३ ॥ नैवताहृक्कचिद्रूपंदृष्टंकेनचिदुत्तमं॥ ज्ञाय
तांकाप्यसौदेवीगृह्यतांचासुरेश्वरः॥ ४४ ॥ स्त्रीरत्नमतिचार्वंगीद्योतयन्तीदिश
स्त्विषा॥ सातुतिष्ठतिदैत्येन्द्र तांभवान्द्रष्टुमर्हति॥ ४५ ॥ यानिरत्नानिमणयोग
जाश्वादीनिवैप्रभो॥ त्रैलोक्येतुसमस्तानिसांप्रतंभांतितेगृहे॥ ४६ ॥ ऐरावतः
समानीतोगजरत्नंपुरंदरात्॥ पारिजाततरुश्चायंतथैवोच्चैःश्रवाहयः॥ ४७ ॥ विमा

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

स० ३॰ ॥ ३२ ॥

नं हंससंयुक्तमेतत्तिष्ठति तेंगणे॥ रत्नभूतमिहानीतं यदासीद्वेधसोद्भुतम्॥४८॥ नि
धिरेष महापद्मः समानीतो धनेश्वरात्॥ किंजल्किनीं ददौ चाब्धिर्मालामम्लानपंक
जां॥ ४९॥ छत्रं ते वारुणं गेहे कांचनस्रावि तिष्ठति॥ तथायं स्यंदनवरो यः पुरासीत्प्र
जापतेः॥५०॥ मृत्योरुत्क्रांतिदा नाम शक्तिरीश त्वया हृता॥ पाशः सलिलराजस्य भ्रा
तुस्तव परिग्रहे॥५१॥ निशुंभस्याब्धिजाताश्च समस्ता रत्नजातयः॥ वह्निरपि ददौ तुभ्यम
ग्निशौचे च वाससी॥५२॥ एवं दैत्येंद्र रत्नानि समस्तान्याहृतानि ते॥ स्त्रीरत्नमेषा कल्या

रमः ॥ ३३ ॥

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

रागीत्वया [redacted] कस्मात्त्वं गच्छसे ते॥ ५३ ॥ ऋषिरुवाच ॥ ५४ ॥ निशम्येति वचः शु
म्भः सत्वरास्तु भास्त्यो ॥ दोषया मामसुरस्य विष्टृते देव्या महासुरं ॥ ५५ ॥ इति चेति च व
क्तव्या सागत्यावचनान्ममः ॥ यथावास्ये संदेशोत्यात तथा कार्य्यं त्वया लघु ॥ ५६ ॥
सतत्रगत्वाय वासैज्ञैलोक्ये हृष्टोपतिष्ठाभने ॥ सादेवीतांततः प्राह श्लक्ष्णमधुरया गि
रा ॥ ५७ ॥ दूत उवाच ॥ ५८ ॥ देवि देवेश्वरः शुम्भस्त्रैलोक्ये परमेश्वरः ॥ इतोहं प्रेषित
स्तेन त्वत्सकाशमिहागत ॥ ५९ ॥ अव्याहताज्ञः सर्वासु यः सदा देवयोनिषु ॥ निर्ज्जि

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi
Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



तारिवल्तेदेत्यारिः स्मयदाहृश्वरगव्यतनृ ॥ ६० ॥ ममत्रैलोक्यमखिलंममदेवावशानु
गाः ॥ यज्ञभागानहंसर्वानुपाश्नामिपृथकपृथक ॥ ६१ ॥ त्रैलोक्येवररत्नानिममव
श्यान्यशेषतः ॥ तथैवगजरत्नंचहृतंदेवेन्द्रवाहनम्‌ः ॥ ६२ ॥ क्षीरोदमथनोद्भूतमश्वर
त्नंममामरैः ॥ उच्चैःश्रवससंज्ञंतत्प्रणिपत्यसमर्पितम्‌ ॥ ६३ ॥ यानिचान्यानिदेवेषु
गन्धर्वेषूरगेषुच ॥ रत्नभूतानिभूतानितानिमय्येवशोभने ॥ ६४ ॥ स्त्रीरत्नभूतांत्वांदेवीं
लोकेमन्यामहेवयं ॥ सात्वमस्मानुपागच्छ यतोरत्नभुजोवयं ॥ ६५ ॥ मांवाममानुजंवा



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

पिनिशुंभमसुरविक्रमे ॥ भजत्वंचंचलापांगिरत्नभूतासिवैयतः ॥ ६६ ॥ परमैश्वर्य
मतुलंप्राप्स्यतेमत्परिग्रहात् ॥ एतद्बुद्ध्वासमालोच्यमत्परिग्रहतांव्रज ॥ ६७ ॥ ऋ
षिरुवाच ॥ ६८ ॥ इत्युक्तासातदादेवीगंभीरांतःस्मिताजगौ ॥ दुर्गाभगवतीभद्रा
ययेदंधार्य्यतेजगत् ॥ ६९ ॥ देव्युवाच ॥ ७० ॥ सत्यमुक्तंत्वयानात्र मिथ्याकिंचित्त्व
योदितं ॥ त्रैलोक्याधिपतिःशुंभोनिशुंभश्चापितादृशः ॥ ७१ ॥ किंत्वत्रयत्प्रतिज्ञा
मिथ्याक्रियतेकथं ॥ श्रूयतामल्पबुद्धित्वात्प्रतिज्ञायाकृतापुरा ॥ ७२ ॥ योमांजयति

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

स· श·
॥३४॥

मयासेयोमेदर्प्पंव्यपोहति ॥ योमेप्रतिबलोलोके समेभर्त्ताभविष्यति ॥७३॥ तदा
गच्छतुशुंभोत्रनिशुंभोवामहासुरः ॥ मांजित्वाकिंचिरेणात्रपाणिंगृह्णातुमेलघु ॥ ॥७४॥
दूतउवाच ॥७५॥ अवलिप्तासिमैवत्वंदेविब्रूहिममाग्रतः ॥ त्रैलोक्येकःपुमांस्ति
ष्ठेदग्रेशुंभनिशुंभयोः ॥ अन्येषामपिदैत्यानांसर्वेदेवानवैयुधि ॥ तिष्ठन्तिसम्मु
खेदेविकिंपुनःस्त्रीत्वमेकिका ॥७७॥ इन्द्राद्याःसकलादेवास्तस्थुर्येषांनसंयुगे ॥ शुं
भादीनांकथंतेषांस्त्रीप्रयास्यसिसम्मुखम् ॥ सात्वंगच्छमयैवोक्तापार्श्वंशुंभनिशुंभ

रास्त:
॥३५॥

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

यो॥ केशाकर्षणनिर्द्धूतगौरवा मा गमिष्यसि ॥ ७८ ॥ देव्युवाच ॥ एवमेतद्ब
लीशुंभो निशुंभश्चातिवीर्य्यवान् ॥ किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा॥
सत्वं गच्छ मयैवोक्तं यदेतत्सर्वमादृतः ॥ तदाचक्ष्वासुरेन्द्राय स च युक्तं करोतु यत्
इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये दूतसंवादः ॥ ऋषिरुवा
च ॥ १ ॥ इत्याकर्ण्य वचो देव्याः स दूतोमर्षपूरितः ॥ समाचष्ट समागम्य दैत्यराजा
य विस्तरात् ॥ २ ॥ तस्य दूतस्य तद्वाक्यमाकर्ण्यासुरराट्ततः ॥ सक्रोधः प्राह दैत्यानां

ध्यानं॥ [illegible] शशि[illegible] ॥ [illegible] नेत्रै[illegible]
[illegible] ॥ [illegible]
[illegible] ॥ ६ ॥

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

स॰ श॰ मधिपं धूम्रलोचनं ॥ ३ ॥ हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः ॥ तामानय बला
॥ ३५ ॥ द्दुष्टां केशाकर्षणविह्वलाम् ॥ ४ ॥ तत्परित्राणदः कश्चिद्यदि वोत्तिष्ठते परः ॥ सह
न्तव्योमरो वापि यक्षो गन्धर्व एव वा ॥ ५ ॥ ऋषिरुवाच ॥ ६ ॥ तेनाज्ञप्तस्ततः शीघ्रं स दैत्यो धूम्र
लोचनः ॥ वृतः षष्ट्या सहस्राणामसुराणां द्रुतं ययौ ॥ ७ ॥ स दृष्ट्वा तां ततो देवीं तुहिनाच
लसंस्थितां ॥ जगादोच्चैः प्रयाहीति मूलं शुम्भनिशुम्भयोः ॥ ८ ॥ न चेत्प्रीत्याद्य भव
ती मद्भर्तारमुपैष्यति ॥ ततो बलान्नयाम्येष केशाकर्षणविह्वलाम् ॥ ९ ॥ देव्युवा

॥ रामः ॥
॥ ३५ ॥

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

च ॥ १० ॥ दैत्येश्वरेण प्रहितो बलवान्बलसंवृतः ॥ बलान्नयसि मामेवं ततः किं
ते करोम्यहं ॥ ११ ॥ ऋषिरुवाच ॥ १२ ॥ इत्युक्तः सोभ्यधावत्तामसुरो धूम्रलोच
नः ॥ हुंकारेणैव तं भस्म साचकाराम्बिका ततः ॥ १३ ॥ अथ क्रुद्धं महासैन्यमसु
राणां तथाम्बिका ॥ ववर्ष सायकैस्तीक्ष्णैस्तथा शक्तिपरश्वधैः ॥ १४ ॥ ततो धु
तसटः कोपात्कृत्वा नादं सुभैरवं ॥ पपातासुरसेनायां सिंहो देव्याः स्ववाहनः ॥ १५
कांश्चित्करप्रहारेण दैत्यानास्येन चापरान् ॥ आक्रान्त्या चाधरेणान्यान्स

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

जघान महासुरम् ॥१५॥ केषांचित्पाटयामास नखैः कोष्ठानि केशरी ॥ तथा तलप्र
हारेण शिरांसि कृतवान्पृथक् ॥१६॥ विछिन्नबाहुशिरसः कृतास्तेन तथापरे ॥ पपौ च रुधि
रं कोष्ठादन्येषां धुतकेशरः ॥१७॥ क्षणेन तद्बलं सर्वं क्षयं नीतं महात्मना ॥ तेन केसरिणा
देव्या वाहनेनातिकोपिना ॥१८॥ श्रुत्वा तमसुरं देव्या निहतं धूम्रलोचनं ॥ बलं च क्षयितं कृ
त्स्नं देवीकेशरिणा ततः ॥१९॥ चुकोप दैत्याधिपतिः शुम्भः प्रस्फुरिताधरः ॥ आज्ञापयामास
च तौ चण्डमुण्डौ महासुरौ ॥२०॥ हे चण्ड हे मुण्ड बलैर्बहुभिः परिवारितौ ॥ तत्र गच्छत गत्वा



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

४ ध्याने॥ ध्यायेहे रत्नपीठे शुककलपठितं शृण्वतीं श्यामलांगीं न्यस्तैकांघ्रीं सरोजे शशि सकलधरां वल्लकीं वादयंतीं॥ कल्हारा बद्धमालां नियमितविलसच्चूलिकां रक्तवस्त्रां

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

चसास्समानीयतांलघु ॥२१॥ केशेष्वाकृष्यबध्वावायदिवः संशयोयुधि ॥ तदाशेषा
युधैः सर्वैरसुरैर्विनिहन्यताम् ॥२२॥ तस्याहृतायांदुष्टायांसिंहेचविनिपातिते ॥ शीघ्रमा
गम्यतांबध्वागृहीत्वातामथांबिकां ॥२३॥ इति मार्कण्डेयपुराणेसावर्णिकेमन्वंतरेदे
वीमाहात्म्येधूम्रलोचनवधः ॥ ऋषिरुवाच ॥१॥ आज्ञप्तास्तेततोदैत्याश्चण्डमुण्डपुरोग
माः ॥ चतुरंगबलोपेतायययुरभ्युद्यतायुधाः ॥२॥ ददृशुस्तेततोदेवीमीषद्धासांव्यवस्थितां
सिंहस्योपरिशैलेन्द्रशृंगेमहतिकाञ्चने ॥३॥ तेदृष्ट्वातांसमादातुमुद्यमंचक्रुरुद्यताः ॥ आ

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

मातंगीं शंखपात्रां मधुमदविवशां चित्रकोद्भासिभालां॥ मं॥७॥

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



कृष्टचापासिधरास्तथान्येतत्समीपगाः॥४॥ ततःकोपंचकारोच्चैरम्बिकातानरीं
न्प्रति॥ कोपेनचास्यावदनंमषीवर्णमभूत्तदा॥५॥ भ्रुकुटीकुटिलात्तस्याललाट
फलकाद्द्रुतम्॥ कालीकरालवदनाविनिष्क्रान्तासिपाशिनी॥६॥ विचित्रखट्वा
ङ्गधरानरमालाविभूषणा॥ द्वीपिचर्मपरीधानाशुष्कमांसातिभैरवा॥७॥ अ
तिविस्तारवदनाजिह्वाललनभीषणा॥ निमग्नारक्तनयनानादापूरितदिङ्मुखा॥८॥
सावेगेनाभिपतिताघातयन्तीमहासुरान्॥ सैन्येतत्रसुरारीणामभक्षयततद्बलं॥९॥



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

पार्ष्णिग्राहांकुशग्राहियोधघण्टासमन्वितान्॥ समादायैकहस्तेन मुखे चिक्षेप वा
रणान्॥१०॥ तथैव योधं तुरगै रथं सारथिना सह॥ निक्षिप्य वक्त्रे दशनैश्चर्वयन्त्यतिभै
रवम्॥११॥ एकं जग्राह केशेषु ग्रीवायामथवा परम्॥ पादेनाक्रम्य चैवान्यमुरसान्यम
पोथयत्॥१२॥ तैर्मुक्तानि च शस्त्राणि महास्त्राणि तथासुरैः॥ मुखेन जग्राह रुषा दश
नैर्मथितान्यपि॥१३॥ बलिनां तद्बलं सर्वमसुराणां दुरात्मनां॥ ममर्दाभक्षयच्चान्या
नन्यांश्चाताडयत्तदा॥१४॥ असिना निहताः केचित्केचित्खट्वाङ्गताडिताः॥ जग्मुर्वि

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

म० श्री०

ना ज्ञमसुरादंताग्नाभिहत्वान्तथा ॥ १५ ॥ क्षणेन तद्बलं सर्वमसुराणां निपातितं ॥ दृष्ट्वा चंडो

॥ ३८ ॥ भिद्रुद्राव तां कालीमतिभीषणां ॥ १६ ॥ शरवर्षैर्महाभीमैर्भीमाक्षीं तां महासुरः ॥ छाद

यामास चक्रैश्च मुण्डः क्षिप्तैः सहस्रशः ॥ १७ ॥ तानि चक्राण्यनेकानि विशमानानि तन्मुखं

बभुर्यथार्कबिम्बानि सुबहूनि घनोदरं ॥ १८ ॥ ततो जहासातिरुषा भीमं भैरवनादिनी ॥ का

लीकरालवक्त्रान्तर्दुर्दर्शदशनोज्ज्वला ॥ १९ ॥ उत्थाय च महासिं हं देवी चण्डमधावत ॥ गृ

हीत्वा चास्य केशेषु शिरस्तेनासिनाछिनत् ॥ २० ॥ अथ मुण्डोऽभ्यधावत्तां दृष्ट्वा चंडं निपातितं ॥

रामः

॥ ३८

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



तमप्यपायतद्रूपोस्मारवक्त्राभिहतंरुषा॥ हतशेषं ततः सैन्यं दृष्ट्वा चण्डं निपातितं॥ मुण्डं
च सुमहावीर्यं दिशो भेजे भयातुरं॥२२॥ शिरश्चण्डस्य काली च गृहीत्वा मुण्डमेव च·
प्राह प्रचण्डाट्टहासमिश्रमभ्येत्य चण्डिकां॥२३॥ मया तवात्रोपहृतौ चण्डमुण्डौ महापशू
युद्धयज्ञे स्वयं शुम्भं निशुम्भं च हनिष्यसि॥२४॥ ऋषिरुवाच॥२५॥ तावानीतौ ततो दृष्ट्वा
चण्डमुण्डौ महासुरौ॥ उवाच कालीं कल्याणी ललितं चण्डिका वचः॥२६॥ यस्माच्च
ण्डं च मुण्डं च गृहीत्वा त्वमुपागता॥ चामुण्डेति ततो लोके ख्याता देवी भविष्यसि॥२७॥

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

स॰ श॰ ॥३६॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये चण्डमुण्डवधः ॥ ऋषिरुवा
च ॥१॥ चण्डे च निहते दैत्ये मुण्डे च विनिपातिते ॥ बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः ॥ २
ततः कोपपराधीनचेताः शुम्भः प्रतापवान् ॥ उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह ॥ ३
अद्य सर्वबलैर्दैत्याः षडशीतिरुदायुधाः ॥ कम्बूनां चतुरशीतिर्निर्यान्तु स्वबलैर्वृताः ॥
॥४॥ कोटिवीर्याणि पंचाशदसुराणां कुलानि वै ॥ शतं कुलानि धौम्राणां निर्गच्छन्तु
ममाज्ञया ॥५॥ कालका दौर्हृदा मौर्याः कालकेयास्तथासुराः ॥ युद्धाय सज्जा निर्या

ध्याने॥ मागधीश्च रविस्फुरं फनिफनो [illegible] रत्नावली [illegible] ॥३८॥

भोपद्म [illegible] धरा [illegible]

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

उन्माज्ञयात्वरितामम ॥ ६ ॥ इत्याज्ञाप्यासुरपतिः शुंभोभैरवशासनः ॥ निर्जगाम महा
सैन्यं सहस्रैर्बहुभिर्वृत ॥ ७ ॥ आयान्तं चंडिका दृष्ट्वा तत्सैन्यमतिभीषणं ॥ ज्यास्वनैः
पूरयामास धरणीगगनान्तरम् ॥ ८ ॥ ततः सिंहो महानादमतीव कृतवान्नृप ॥ घंटा
स्वनेन तन्नादमंबिका चोपबृंहयत् ॥ ९ ॥ धनुर्ज्यासिंहघंटानां नादापूरितदिङ्मुखा
निनादैर्भीषणैः काली जिग्ये विस्तारितानना ॥ १० ॥ तन्निनादमुपश्रुत्य दैत्यसैन्यैश्चतु
र्दिशम् ॥ देवी सिंहस्तथा काली सरोषैः परिवारिता ॥ ११ ॥ एतस्मिन्नन्तरे भूप विनाशाय

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



वा

सुरद्विषां ॥ भयामरासिंहानामतिवीर्यबलान्विताः ॥१२॥ ब्रह्मेशगुहविष्णूनां तथेन्द्र
स्य च शक्तयः ॥ शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः ॥१३॥ यस्य देवस्य यद्रू
पं यथाभूषणवाहनं ॥ तद्वदेव हि तच्छक्तिरसुरान्योद्धुमाययौ ॥१४॥ हंसयुक्तवि
मानाग्रे साक्षसूत्रकमण्डलुः ॥ आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते ॥१५
माहेश्वरी वृषारूढा त्रिशूलवरधारिणी ॥ ॥ महाहिवलया प्राप्ता चन्द्ररेखाविभू
षणा ॥१६॥ कौमारी शक्तिहस्ता च मयूरवरवाहना ॥ योद्धुमभ्याययौ दैत्यानम्बिका



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

गृह्यपरमी ॥१७॥ तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता ॥ शंखचक्रगदा
शार्ङ्गखड्गहस्ताभ्युपाययौ ॥१८॥ यज्ञवाराहमतुलं रूपं या बिभ्रतो हरेः ॥ शक्तिः
साप्याययौ तत्र वाराहीं बिभ्रती तनुम् ॥१९॥ नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः
प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः ॥२०॥ वज्रहस्ता तथैवैन्द्री गजराजोपरि स्थि
ता ॥ प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा ॥२१॥ ततः परिवृतस्ताभिरीशा
नो देवशक्तिभिः ॥ हन्यन्तामसुराः शीघ्रं मम प्रीत्याह चण्डिकां ॥२२॥ ततो देवी

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



शरीरात्तु विनिष्क्रान्तातिभीषणा॥ चण्डिकाशक्तिरत्युग्रा शिवाशतनिनादिनी॥२३॥ सा
चाह धूम्रजटिलमीशानमपराजिता॥ दूत त्वं गच्छ भगवन् पार्श्वं शुम्भनिशुम्भयोः॥२४॥ ब्रू
हि शुम्भं निशुम्भं च दानवावतिगर्वितौ॥ ये चान्ये दानवास्तत्र युद्धाय समुपस्थिताः॥२५॥ त्रै
लोक्यमिन्द्रो लभतां देवाः सन्तु हविर्भुजः॥ यूयं प्रयात पातालं यदि जीवितुमिच्छथ॥२६॥ ब
लावलेपादथ चेद्भवन्तो युद्धकाङ्क्षिणः॥ तदागच्छत तृप्यन्तु मच्छिवाः पिशितेन वः॥२७॥ यतो
नियुक्तो दौत्येन तया देव्या शिवः स्वयं॥ शिवदूतीति लोकेस्मिंस्ततः सा ख्यातिमागता॥२८

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



तेपिश्रुत्वावचोदेव्याःशर्वाख्यातंमहासुराः॥अमर्षापूरिताजग्मुर्यतःकात्यायनीस्थिता॥
२९॥ततःप्रथममेवाग्रेशरशक्त्यृष्टिवृष्टिभिः॥ववर्षुरुद्धतामर्षास्तांदेवीममरारयः॥३०॥
साचतान्प्रहितान्बाणान्शूलशक्तिपरश्वधान्॥चिच्छेदलीलयाध्मातधनुर्मुक्तैर्महेषु
भिः॥तस्याग्रतस्तथाकालीशूलपातविदारितान्॥खट्वांगपोथितांश्चारीन्कुर्वतीव्यच
गो रत्तदा॥३२॥कमण्डलुजलाक्षेपहतवीर्यान्हतौजसः॥ब्रह्माणीचाकरोच्छत्रून्येनयेनस्म
धावति॥३३॥माहेश्वरीत्रिशूलेनतथाचक्रेणवैष्णवी॥दैत्याञ्जघानकौमारीतथाशक्त्या

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



तिकोपना ॥३३॥ ऐन्द्रीकुलिशपातेन शतशो दैत्यदानवाः ॥ पेतुर्विदारिताः पृथ्व्यां रुधिरौघ
प्रवर्षिणः ॥३४॥ तुंडप्रहारविध्वस्ता दंष्ट्राग्रक्षतवक्षसः ॥ वाराहमूर्त्या न्यपतंश्चक्रेण च वि
दारिताः ॥३६॥ नखैर्विदारितांश्चान्यान्भक्षयन्ती महासुरान् ॥ नारसिंही चचाराजौ नाद
पूर्णदिगंवरा ॥३७॥ चण्डाट्टहासैरसुराः शिवदूत्यभिदूषिताः ॥ पेतुः पृथिव्यां पतितांस्तां
श्चखादाथ सा तदा ॥ ३८ ॥ इति मातृगणं क्रुद्धं मर्दयंतं महासुरान् ॥ दृष्ट्वाभ्युपायैर्विवि
धैर्नेशुर्देवारिसैनिकाः ॥३९॥ पलायनपरान्दृष्ट्वा दैत्यान्मातृगणार्दितान् ॥ योद्धुमभ्याययौ



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

द्धो रक्तवीजो महासुरः ॥ ४० ॥ रक्तविन्दुर्य्यदा भूमौ पतत्यस्य शरीरतः ॥ समुत्पतति
मेदिन्यां तत्प्रमाणस्तदासुरः ॥ ४१ ॥ युयुधे स गदापाणिरिन्द्रशक्त्या महासुरः ॥ ततश्चै
न्द्री स्ववज्रेण रक्तवीजमताडयत् ॥ ४३ ॥ कुलिशेनाहतस्याशु तस्य सुस्राव शोणि
तं ॥ समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः ॥ ४४ ॥ यावंतः पुरुषा जातास्तद्वीर्य्यव
लविक्रमाः ॥ ४५ ॥ ते चापि युयुधुस्तत्र पुरुषा रक्तसंभवाः ॥ समं मातृभिरत्युग्रशस्त्रपाता
तिभीषणं ॥ ४६ ॥ पुनश्च वज्रपातेन क्षतमस्य शिरो यदा ॥ ववाह रक्तं पुरुषास्ततो जाता

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



ःमहासुराः ॥४७॥ वैष्णवीसमरेचैनंचक्रेणाभिजघानह ॥ गदयाताडयामासऐ
न्द्रीतमसुरेश्वरम् ॥४८॥ वैष्णवीचक्रभिन्नस्यरुधिरस्रावसंभवैः ॥ सहस्रशोजग
द्व्याप्तंतत्प्रमाणैर्महासुरैः ॥४९॥ शक्त्याजघानकौमारीवाराहीचतथासिना ॥ माहे
श्वरीत्रिशूलेनरक्तवीजंमहासुरम् ॥५०॥ सचापिगदयादैत्यःसर्वाएवाहनत्पृथक् ॥ मा
तॄःकोपसमाविष्टोरक्तवीजोमहासुरः ॥५१॥ तस्याहतस्यबहुधाशक्तिशूलादिभि
र्भुवि ॥ पपातयोवैरक्तौघस्तेनासञ्छतशोसुराः ॥५२॥ तैश्चासुरासृक्संभूतैरसुरैःसकलं



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



जगत् ॥ व्याप्तमासीत्ततो वाभयमाजग्मुरुत्तमं ॥ ५३ ॥ तान्विषण्णान्सुरंदृष्ट्वा
चण्डिकाप्राहसत्वरा ॥ उवाचकालींचामुंडे विस्तीर्णंवदनंकुरु ॥ ५४ ॥ मच्छस्त्रपात
संभूतान्रक्तविन्दून्महासुरान् ॥ रक्तविंदोःप्रतिछत्वंवक्त्रेणानेनवेगिता ॥ ५५ ॥
भक्षयन्तीचररणे तदुत्पन्नान्महासुरान् ॥ एवमेषक्षयंदैत्यः क्षीणरक्तोगमिष्य
ति ॥ ५६ ॥ भक्ष्यमाणास्त्वयाचोग्रा नचोत्पत्स्यन्तिचापरे ॥ इत्युक्त्वातांततोदेवीशूलेना
भिजघानतं ॥ ५७ ॥ मुखेनकालीजगृहे रक्तवीजस्यशोणितं ॥ ततोसावाज

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



घानाथ गदयातत्र चंडिकां ॥५८॥ नचास्यावेदनां चक्रे गदापातोल्पिकामपि ॥ तस्याह
तस्यदेहात्तु बहुसुस्राव शोणितं ॥५९॥ यतस्ततस्तद्वक्त्रेण चामुंडा संप्रतीछति ॥ मुखेसम
मुद्गता येस्या रक्तपातान्महासुराः ॥६०॥ तांश्चखादाथ चामुंडा पपौतस्य च शोणितं ॥ देवीशू
लेनवज्रेण वाणैरसिभिरृष्टिभिः ॥६१॥ जघान रक्तवीजं तं चामुंडा पीतशोणितं ॥ स
पपात महीपृष्ठे शस्त्रसंघसमाहतः ॥६२॥ नीरक्तश्च महीपाल रक्तवीजो महासुरः
ततस्ते हर्षमतुलमवापुस्त्रिदशा नृपः ॥६३॥



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

तेषां मातृगणो जातो ननर्त्तासृङ्मदोद्धतः ॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके
मन्वंतरे देवीमाहात्म्ये रक्तबीजवधः ॥ राजोवाच ॥ १ ॥ विचित्रमिदमाख्यातं
भगवन्भवता मम ॥ देव्याश्चरितमाहात्म्यं रक्तबीजवधाश्रितं ॥ २ ॥ भूयश्चेच्छाम्यहं श्रो
तुं रक्तबीजे निपातिते ॥ चकार शुंभो यत्कर्म निशुंभश्चातिकोपन ॥ ३ ॥ ऋषिरुवाच ४ ॥
चकार कोपमतुलं रक्तबीजे निपातिते ॥ शुंभासुरो निशुंभश्च हतेष्वन्येषु चाहवे ॥ ५ ॥ हन्य
मानं महासैन्यं विलोक्यामर्षमुद्वहन् ॥ अभ्यधावन्निशुंभोथ मुख्ययासुरसेनया ॥ ६ ॥

ध्याने ॥ अरुणा करुणा. तरंगी. ताक्षिं धृत पा शां कुस बाण चा प हस्तां ॥ अणि मा दि
भिरावृतां. मयुखै. रहमीत्येव. विभावये भवानिम्. ॥ ८ ॥

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुराः ॥ संदष्टौष्ठपुटाः क्रुद्धा हंतुं देवीमुपाययुः ॥
आजगाम महावीर्यः शुंभोपि स्वबलैर्वृतः ॥ निहंतुं चंडिकां कोपात्कृत्वा युद्धं तु मा
तृभिः ॥ ८ ॥ ततो युद्धमतीवासीद्देव्याः शुंभनिशुंभयोः ॥ शरवर्षमतीवोग्रं मेघयोरिव
वर्षतोः ॥ ९ ॥ चिच्छेदास्तां छरांस्ताभ्यां चंडिका स्वशरोत्करैः ॥ ताडयामास चांगेषु श
स्त्रौघैरसुरेश्वरौ ॥ १० ॥ निशुंभो निशितं खड्गं चर्म चादाय सुप्रभं ॥ अताडयन्मूर्द्धि
सिंहं देव्या वाहनमुत्तमं ॥ ११ ॥ ताडिते वाहने देवी क्षुरप्रेणासिमुत्तमं ॥ निशुंभस्याशु



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

विछेदचर्म्मचाप्यष्टचन्द्रकं ॥ १२ ॥ छिन्नेचर्म्मणिखड्गेचशक्तिंचिक्षेपसोसुरः ॥ ताम्
प्यस्यद्विधाचक्रेचक्रेणाभिमुखागतां ॥ १३ ॥ कोपाध्मातोनिशुंभोथशूलंजग्राहदान
वः ॥ आयातंमुष्टिपातेनदेवीतच्चाप्यचूर्णयत् ॥ १४ ॥ आविध्यातगदांसोपिचिक्षे
पचण्डिकांप्रति ॥ सापिदेव्यात्रिशूलेनभिन्नाभस्मत्वमागता ॥ १५ ॥ ततःपरशुहस्तं
तमायातंदैत्यपुंगवं ॥ आहत्यदेवीबाणौघैरपातयतभूतले ॥ १६ ॥ तस्मिन्निपतिते
भूमौनिशुंभेभीमविक्रमे ॥ भ्रातर्य्यतीवसंक्रुद्धःप्रययौहंतुमंबिकां ॥ १७ ॥ सरथस्तथा
स्थ

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



सर्वैर्देवीतपस्मायुधैः ॥ अंजैरस्त्राभिभूतैर्व्याप्ता क्षेत्रं व भोनभः ॥ १८ ॥ तस्मायांते सम
लोक्ये देवीशंखमवादयत् ॥ ज्याशब्दं चापि धनुषश्चकारातीव दुःसहं ॥ १९ ॥ पूर
यामास ककुभो निजघंटास्वनेन च ॥ समस्तदैत्यसैन्यानां तेजोवधविधायिना ॥ २० ॥
ततः सिंहो महानादैस्त्याजितेभमहामदैः ॥ पूरयामास गगनं गांतथैव दिशोदश ॥ २१ ॥
ततः कालीसमुत्पत्य गगनं क्ष्मामताडयत् ॥ कराभ्यां तन्निनादेन प्राक्स्वनास्ते तिरोहि
ताः ॥ २२ ॥ अट्टहासमशिवं शिवदूती चकार ह ॥ तैः शब्दैरसुरास्त्रेसुः क्षोभः कोपं परं य



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

यो॥ २३॥ दूरात्मंतिष्ठतिष्ठतिव्याजहाराम्बिकायदा॥ तदाजयेत्यभिहितंदेवैराका
शसंस्थितैः॥ २४॥ शुंभेनागत्ययाशक्तिर्मुक्ताज्वालातिभीषणा॥ आयांतीवह्नि
कूटाभासानिरस्तामहोल्कया॥ २५॥ सिंहनादेनशुंभस्यव्याप्तंलोकत्रयांतरं॥ नि
र्घातनिःस्वनोघोरोजितवानवनीपते॥ २६॥ शुंभमुक्तांछरांदेवीशुंभस्तत्प्रहितांछ
रान्॥ चिच्छेदस्वशरैरुग्रैःशतशोथसहस्रशः॥ २७॥ ततःसाचंडिकाक्रुद्धाशूलेनाभि
जघानतं॥ सतदाभिहतोभूमौमूर्छितोनिपपातह॥ २८॥ ततोनिशुंभःसंप्राप्यचेतना

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



मात्तकार्मुकः ॥ आजघानशरैर्देवींकालींकेसरिणंतथा ॥ २९ ॥ पुनश्चकृत्वाबा
हुनामयुतंदनुजेश्वरः ॥ चक्रायुधेनदितिजश्छादयामासचण्डिकां ॥ ३० ॥ ततोभ
गवतीक्रुद्धादुर्गादुर्गार्त्तिनाशिनी ॥ चिच्छेदतानिचक्राणिस्वशरैःसायकांश्चता
न ॥ ३१ ॥ ततोनिशुम्भोवेगेनगदामादायचण्डिकाम् ॥ अभ्यधावतवैहन्तुंदैत्य
सेनासमावृतः ॥ ३२ ॥ तस्यापततएवाशुगदांचिच्छेदचण्डिका ॥ खड्गेनशितधारेणस
चशूलंसमाददे ॥ ३३ ॥ शूलहस्तंसमायान्तंनिशुम्भममरार्द्दनं ॥ हृदिविव्याधशूलेनवेगा



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

विछिन्नचण्डिका ॥ ३४ ॥ भिन्नस्यतस्यशूलेनहृदयान्निःसृतोपरः ॥ महाबलोमहावीर्य्य
स्तिष्ठेतिपुरुषोवदन् ॥ ३५ ॥ तस्यनिष्क्रामतोदेवीप्रहस्यस्वनवत्ततः ॥ शिरश्चिछेदखड्गेन
ततोसावापतद्भुवि ॥ ३६ ॥ ततःसिंहश्चखादोग्रदंष्ट्राक्षुण्णशिरोधरान् ॥ असुरांस्तांस्तथा
कालीशिवदूतीतथापरान् ॥ ३७ ॥ कौमारीशक्तिनिर्भिन्नाःकेचिन्नेशुर्महासुराः
ब्रह्माणीमन्त्रपूतेनतोयेनान्येनिराकृता ॥ ३८ ॥ माहेश्वरीत्रिशूलेनभिन्नाःपेतुस्तथापर
वाराहीतुण्डघातेनकेचिच्चूर्णीकृताभुवि ॥ ३९ ॥ खण्डखण्डंचचक्रेणवैष्णव्यादानवाः

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

२ ध्यानं ॥ संत ब्रह्मे मह्नुचित्रं. रविचन्द्र वह्नि. नेत्रा धत्र शरय्य मंकुशापाशश्च. री. ॥ रक्तैः पुष्पैः स्त्रं दध
ती. शिवशक्तिरूपा. कामेश्वरी. मिहमज्ञामि देवी गुरे रखां म्न ॥१०॥

म. श्र.
४८

ष्टताः॥ चक्रे शोचेन्द्रहताम्र विम्स्केन तथापरे ॥४०॥ केचिद्विनेशुरसुराः केचिन्नष्टा महा
हवात् ॥ भक्षिताश्चापरे काली शिवदूती मृगाधिपैः॥४१॥ इति मार्कण्डेयपुराणे सावर्णि
के मन्वन्तरे देवीमाहात्म्ये निशुम्भवधः॥ ऋषिरुवाच ॥१॥ निशुम्भं निहतं दृष्ट्वा भ्रातरं प्राण
सम्मितं ॥ हन्यमानं बलं चैव शुम्भः क्रुद्धो ब्रवीद्वचः ॥२॥ बलावलेपदुष्टे त्वं मा दुर्गे गर्वमा
वह ॥ अन्यासां बलमाश्रित्य युद्ध्यसे यातिमानिनी ॥३॥ देव्युवाच ॥४॥ अहं विभूत्या बहु
भिरिह रूपैर्यदास्थिता ॥ तत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव ॥५॥ ऋषिरुवाच ॥१०॥

॥५॥
एकैवाहं जगत्यत्र द्वितीया का ममापरा ॥ पश्यैता दुष्ट मय्येव विशन्त्यो मद्विभूतयः ॥ ऋषिरुवाच ॥ ६ ॥ रामः
ततः समस्तास्ता देव्यो ब्रह्माणीप्रमुखा लयं ॥ तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदाम्बिका ॥ देव्युवाच ॥ ८ ॥४८॥
॥७॥

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi
Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

ततःप्र वृहते युद्धं देव्याः शुंभस्य चोभयोः ॥ पश्यतां सर्वदेवाना मसुराणां च दारुणं ॥६
शरवर्षैः शितैः शस्त्रैस्तथास्त्रैश्चैव दारुणैः ॥ ततो युद्धमभूद्भूयः सर्वलोकभयंक
रम् ॥७ ॥ दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथाम्बिका ॥ ॥ बभंज तानि दैत्येन्द्र
स्तत्प्रतीघातकर्तृभिः ॥८ ॥ मुक्तानि तेन चास्त्राणि दिव्यानि परमेश्वरी ॥ बभंज
लीलयैवोग्रहुंकारोच्चारणादिभिः ॥९ ॥ ततः शरशतैर्देवीमाच्छादयत सोऽसुरः ॥
सापि तत्कुपिता देवी धनुश्चिच्छेद चेषुभिः ॥ छिन्ने धनुषि दैत्येन्द्रस्तथा शक्तिमथाददे १०

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

म॰ श॰ ॥४८॥

चिछेददेवीचक्रेणतामप्यस्यकरस्थिताम्॥११॥ ततःखड्गमुपादायशतचन्द्रंचभा
नुमत्॰ अभ्यधावत्तदादेवींदैत्यानामधिपेश्वरः॥१२॥ तस्यापततएवाशुखड्गंचिछेद
चण्डिका॥ धनुर्मुक्तैःशितैर्वाणैश्चर्म्मचार्ककरामलं॥१३॥ हताश्वःसतदादैत्य
श्छिन्नधन्वाविसारथिः॥ जग्राहमुद्गरंघोरमम्बिकानिधनोद्यः॥१४॥ चिछेद
पततस्तस्यमुद्गरंनिशितैःशरैः॥ तथापिसोभ्यधावत्तांमुष्टिमुद्यम्यवेगवान्॰॥१५॥
समुष्टिंपातयामासहृदयेदैत्यपुंगवः॥ देव्यास्तंचापिसादेवीतलेनोरस्यताडयत्॥१६

स्वा॰२

राम॰ ॥४८॥

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



तल्लग्नघाताभिहतो निपपात महीतले ॥ सदैत्यराजः सहसा पुनरेव तथोत्थितः ॥ २१ ॥
उत्पत्य च प्रगृह्योच्चैर्देवीं गगनमास्थितः ॥ तत्रापि सा निराधारा युयुधे तेन चण्डि
का ॥ १८ ॥ नियुद्धं खे तदा दैत्यश्चण्डिका च परस्परं ॥ चक्रतुः प्रथमं सिद्धमुनिविस्मयकार
कं ॥ १९ ॥ ततो नियुद्धं सुचिरं कृत्वा तेनाम्बिका सह ॥ उत्पात्य भ्रामयामास चिक्षेप
धरणीतले ॥ २० ॥ स क्षिप्तो धरणीं प्राप्य मुष्टिमुद्यम्य वेगितः ॥ अभ्यधावत दुष्टा
त्मा चण्डिकानिधनेच्छया ॥ तमायान्तं ततो देवी सर्वदैत्यजनेश्वरम् ॥ जगत्यां पा

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

॥ स· श ॥

॥ ५० ॥

तयामामसः ◌ भित्वाशु लिनवक्षसि ॥ २१ ॥ सगतासुः पपातोर्व्यां देवीशूलाग्रविक्षतः
चालयन्सकलान्पृथ्वीं साब्धिद्वीपां सपर्वताम् ॥ २२ ॥ ततः प्रसन्नमखिलं हते तत
स्मिन्दुरात्मनि ॥ जगत्स्वास्थ्यमतीवाप निर्मलं चाभवन्नभः ॥ उत्पातमेघाः सोल्का
ये प्रागासंस्ते शमं ययुः ॥ सरितो मार्गवाहिन्यस्तथासंस्तत्र पातिते ॥ २४ ॥ ततो देव
गणाः सर्वे हर्षनिर्भरमानसाः ॥ बभूवुर्निहते तस्मिन्गन्धर्वा ललितं जगुः ॥ २५ ॥
अवादयंस्तथैवान्ये ननृतुश्चाप्सरोगणाः ॥ ववुः पुण्यास्तथा वाताः सुप्रभोऽभूद्दिवाकरः २६

रामः

॥ ५० ॥

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

ध्याने ॥ उग्रदीप्त[illegible]किरिटं [illegible] मुखवीयरदं ऊ
२ रापाशा भीतिकरं प्रणमजे भुवनेशीम् ॥ ११ ॥

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

जज्वलुश्चाग्नयः शांताः शान्तादिग्जनितस्वनाः ॥ २६ ॥ इतिमार्कंडेयपुराणेसाव
र्णिकेमन्वन्तरेदेवीमाहात्म्येशुम्भवधः ॥ ऋषिरुवाच ॥ १ ॥ देव्याहतेतत्र महासुरेन्द्रे
सेन्द्राः सुरावह्निपुरोगमास्ता ॥ कात्यायनींतुष्टुवुरिष्टलंभाद्विकाशिवक्त्रा अवि
काशिताशाः ॥ २ ॥ देविप्रपन्नार्तिहरेप्रसीदप्रसीदमातर्जगतोखिलस्य ॥ प्रसीद
विश्वेश्वरिपाहिविश्वं त्वमीश्वरीदेविचराचरस्य ॥ ३ ॥ आधारभूताजगतस्त्वमेका
महीस्वरूपेणयतः स्थितासि ॥ अपांस्वरूपस्थितयात्वयैतदाप्यायतेकृत्स्नमलंघ्य

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



वीर्ये ॥४॥ त्वंवैष्णवीशक्तिरनंतवीर्य्याविश्वस्यवीजंपरमासिमाया ॥ संमोहितं
देविसमस्तमेतत्त्वंवैप्रपन्नाभुविमुक्तिहेतुः ॥ ५ ॥ विद्याःसमस्तास्तवदेविभेदाःस्त्रियः
समस्ताःसकलाजगत्सु ॥ त्वयैकयापूरितमम्बयैतत्कातेस्तुतिःस्तव्यपरापरोक्तिः ॥६॥
सर्वभूतायदादेवीस्वर्गमुक्तिप्रदायनी ॥ त्वंस्तुतास्तुतयेकावाभवन्तुपरमोक्तयः ॥७॥
सर्वस्यबुद्धिरूपेणजनस्यहृदिसंस्थिते ॥ स्वर्गापवर्गदेदेविनारायणिनमोस्तुते ॥८॥
कलाकाष्ठादिरूपेणपरिणामप्रदायिनि ॥ विश्वस्योपरतौशक्तेना० ॥९॥ सर्वमंगलमं



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

गत्ये शिवे सर्व्वार्थसाधिके ॥ शरण्ये त्र्यम्बके गौरि ना० ॥ १० ॥ सृष्टिस्थितिवि
नाशानां शक्तिभूते सनातनि ॥ गुणाश्रये गुणमये ना० ॥ ११ ॥ शरणागतदीनार्त्तप
रित्राणपरायणे ॥ सर्व्वस्यार्त्तिहरे देवि ना० ॥ १२ ॥ हंसयुक्तविमानस्थे ब्रह्माणीरू
पधारिणी ॥ कोशाम्भःक्षरिके देवि ना० ॥ १३ ॥ त्रिशूलचन्द्राहिधरे महावृषभवाहिनि
माहेश्वरीस्वरूपेण ना० ॥ १४ ॥ मयूरकुक्कुटवृते महाशक्तिधरेनघे ॥ कौमारीरूपसंस्था
नेना० ॥ १५ ॥ शंखचक्रगदाशार्ङ्गगृहीतपरमायुधे ॥ प्रसीद वैष्णवीरूपेना० ॥ १६ ॥ गृहीतो

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



ग्रमहाचक्रे दंष्ट्रोद्धृतवसुंधरे ॥ वाराहरूपिणि शिवेना० ॥ १७ ॥ नृसिंहरूपेणोग्रेण हंतुं
दैत्यान्कृतोद्यमे ॥ त्रैलोक्यत्राणसहितेना० ॥ १८ ॥ किरीटिनि महावज्रे सहस्रनय
नोज्वले ॥ वृत्रप्राणहरे चैन्द्रीना० ॥ १९ ॥ शिवदूतीस्वरूपेण हतदैत्यमहाबले ॥ घोररू
पे महारावेना० ॥ २१ ॥ दंष्ट्राकरालवदने शिरोमालाविभूषणे ॥ चामुंडे मुण्डमथने
ना० ॥ २२ ॥ लक्ष्मी लज्जे महाविद्ये श्रद्धे पुष्टि स्वधे ध्रुवे ॥ महारात्रि महामायेना० ॥ २३ ॥
मेधे सरस्वति वरे भूति बाभ्रवि तामसि ॥ नियतेत्वं प्रसीदेशेना० ॥ २४ ॥ सर्वस्वरूपे स



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

र्वेशे सर्वशक्तिसमन्विते ॥ भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोस्तु ते ॥ २४ ॥ एतत्ते
वदनं सौम्यं लोचनत्रयभूषितं ॥ पातु नः सर्वभीतिभ्यः कात्यायनि नमोस्तु ते ॥ २५
ज्वालाकरालमत्युग्रमशेषासुरसूदनं ॥ त्रिशूलं पातु नो भीतेर्भद्रकालि नमोस्तु ते · २६
हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् ॥ सा घण्टा पातु नो देवि पापेभ्यो नः सुतानि
व ॥ २७ ॥ असुरासृग्वसापंकचर्चितस्ते करोज्ज्वलः ॥ शुभाय खड्गो भवतु चण्डिके त्वां
नता वयं ॥ २८ ॥ रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान् सकलानभीष्टान् ॥ त्वामा

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



श्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयांति ॥२९॥ एतत्कृतं यत्कदनं त्व
याद्य धर्मद्विषां देवि महासुराणां ॥ रूपैरनेकैर्बहुधात्ममूर्त्तिं कृत्वांबिके तत्प्रकरोति
कान्या ॥३०॥ विद्यासु शास्त्रेषु विवेकदीपेष्वाद्येषु वाक्येषु च का त्वदन्या ॥ ममत्व
गर्त्तेतिमहान्धकारे विभ्रामयत्येतदतीव विश्वं ॥३१॥ रक्षांसि यत्रोग्रविषाश्च नागा य
त्रारयो दस्युबलानि यत्र ॥ दावानलो यत्र तथाब्धिमध्ये तत्र स्थिता त्वं परिपासि
विश्वं ॥३२॥ ॥ श्रीरामचन्द्राय नमः ॥ विश्वेश्वरि त्वं परिपासि विश्वं विश्वात्मिका धार



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

यसीति विश्वं ॥ विश्वेशवंद्या भ[illegible] वती भवन्ति विश्वाश्रया ये त्वयि भक्ति
नम्राः ॥ ३३ ॥ देवि प्रसीद परिपालय नोरिभीतेर्नित्यं यथासुरवधाधुनैव सद्यः ॥ पाप
नि सर्व्वजगतां प्रशमं नयाशु उत्पातपाकजनितांश्च महोपसर्गान् ॥ ३४ ॥ प्रणतानां
प्रसीद त्वं देवि विश्वार्त्तिहारिणि ॥ त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव ॥ ३५
देव्युवाच ॥ ३६ ॥ वरदाहं सुरगणा वरं यन्मनसेच्छथ ॥ तं वृणुध्वं प्रयच्छामि जगता
मुपकारकं ॥ ३७ ॥ देवा ऊचुः ॥ ३८ ॥ सर्व्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ॥ एवमे

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

म॰ श्री ॥५८॥

त्थं त्वया कार्य्यमस्मद्वैरिविनाशनं ॥ देव्युवाच ॥ ४० ॥ वैवस्वतेन्तरे प्राप्ते अष्टा
विंशतिमे युगे ॥ शुंभो निशुंभश्चैवान्यावुत्पत्स्येते महासुरौ ॥ ४१ ॥ नंदगोपगृहे
जाता यशोदागर्भसंभवा ॥ ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी ॥ ४२
पुनरप्यतिरौद्रेण रूपेण पृथिवीतले ॥ अवतीर्य्य हनिष्यामि वैप्रचित्तांस्तु दा
नवान् ॥ ४३ ॥ भक्षयन्त्याश्च तानुग्रान्वैप्रचित्तान्महासुरान् ॥ रक्तादंता भविष्यन्ति
दाडिमीकुसुमोपमाः ॥ ४४ ॥ ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः ॥ स्तुवन्तो

रामः ॥५८॥

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

ध्याहरिष्यन्ति मतं रक्तदन्तिकाम् ॥ ४५ ॥ भूयश्च शतवार्षिक्यामनावृष्ट्यामनं
भसि ॥ मुनिभिः संस्तुता भूमौ संभविष्याम्ययोनिजा ॥ ४६ ॥ ततः शतेन नेत्रा
णां निरीक्षिष्याम्यहं मुनीन् ॥ कीर्तयिष्यन्ति मनुजाः शताक्षीमिति मां ततः ४७
ततोहमखिलं लोकमात्मदेहसमुद्भवैः ॥ भरिष्यामि सुराः शाकैरावृष्टेः प्राण
धारकैः ॥ ४८ ॥ शाकंभरीति विख्यातिं तदा यास्याम्यहं भुवि ॥ तत्रैव च वधिष्यामि
दुर्गमाख्यं महासुरम् ॥ ४९ ॥ दुर्गादेवीति विख्यातं तन्मे नाम भविष्यति ॥ पुनश्चाहं

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

स॰ श॰ यदाभीमं रूपं कृत्वा हिमाचले ॥ ५० ॥ रक्षांसि भक्षयिष्यामि मुनीनां त्राणकार-
॥ ५५ ॥ णात् ॥ तदा मां मुनयः सर्वे स्तोष्यंत्यानम्रमूर्त्तयः ॥ ५१ ॥ भीमा देवीति विख्याते त-
॥॥ ३ न्मे नाम भविष्यति ॥ यदारुणाख्यस्त्रैलोक्ये महाबाधां करिष्यति ॥ ५२ ॥ तदाहं भ्राम-
रं रूपं कृत्वा संख्येयषट्पदं ॥ त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरं ॥ ५३ ॥
भ्रामरीति च मां लोकास्तदा स्तोष्यंति सर्वतः ॥ इत्थं यदा यदा बाधा दानवोत्था भवि-
ष्यति ॥ ५४ ॥ तदा तदावतीर्याहं करिष्याम्यरिसंक्षयं ॥ इति मार्कण्डेयपुराणे सावर्णिके
धाने ॥ विद्युद्दामसमप्रभां मृगपतिस्कंधस्थितां भीषणां कन्याभिः करवालखे- स्मेः
टवा विलसद्भिरासेविताम् ... ॥ ५५ ॥

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

दवी चा[illegible]त्रिनेत्रांस्मरन्

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



सिके मन्वंतरे देवीमाहात्म्ये नारायणीस्तुतिः ॥ देव्युवाच ॥ १ ॥ एभिः स्तवैश्च
मांनित्यं स्तोष्यते यः समाहितः ॥ तस्याहं सकलां बाधां शमयिष्याम्यसंशयं २
मधुकैटभनाशं च महिषासुरघातनं ॥ कीर्त्तयिष्यन्ति ये तद्वद्वधं शुंभ निशुंभ
योः ॥ ३ ॥ अष्टम्यां च चतुर्द्दश्यां नवम्यां चैकचेतसः ॥ श्रोष्यन्ति चैव ये भक्त्या मम
माहात्म्यमुत्तमं ॥ ४ ॥ न तेषां दुष्कृतं किंचिद्दुष्कृतोत्था न चापदः ॥ भविष्यति
न दारिद्र्यं न चैवेष्ट वियोजनं ॥ ५ ॥ शत्रुतो न भयं तस्य दस्युतो वा न राजतः ॥ न शस्त्रा

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



नलतोयोघात्कदाचित्संभविष्यति ॥ ६ ॥ तस्मान्ममैतन्माहात्म्यंपठितव्यंसमाहि
तैः ॥ श्रोतव्यंचसदाभक्त्यापरंस्वस्त्ययनंहितत् ॥ ७ ॥ उपसर्गानशेषांस्तुमहामा
रीसमुद्भवान् ॥ तथात्रिविधमुत्पातंमाहात्म्यंशमयेन्मम ॥ ८ ॥ यत्रैतत्पठ्यते
सम्यङ्नित्यमायतनेमम ॥ सदानतद्विमोक्ष्यामिसान्निध्यंतत्रमेस्थितं ॥ ९ ॥
वलिप्रदानेपूजायामग्निकार्येमहोत्सवे ॥ सर्व्वंममैतच्चरितमुच्चार्य्यंश्राव्यमेव
च ॥ १० ॥ जानताजानतावापिवलिपूजांतथाकृताम् ॥ प्रतीक्षिष्याम्यहंप्रीत्या



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

वह्निर्होमंतथाकृतं ॥ ११ ॥ शरत्कालेमहापूजा क्रियतेयाच वार्षिकी ॥ तस्याम्म
मैतन्माहात्म्यं श्रुत्वाभक्ति समन्वितः ॥ १२ ॥ सर्वबाधाविनिर्मुक्तो धनधान्य समन्वि
तः ॥ मनुष्योमत्प्रसादेनभविष्यतिनसंशयः ॥ १३ ॥ श्रुत्वाममैतन्माहात्म्यं तथा
चोत्पत्तयः शुभाः ॥ पराक्रमंचयुद्धेषुजायतेनिर्भयः पुमान् ॥ १४ ॥ रिपवः संक्षयं
यांतिकल्याणंचोपपद्यते ॥ नंदतेचकुलंपुंसां माहात्म्यंममशृण्वताम् १५ शां
तिकर्मणि सर्वत्रतथादुःस्वप्नदर्शने ॥ ग्रहपीडासुचोग्रासु माहात्म्यंशृणुयान्मम १६

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



उपसर्गाः समंयांतिग्रहपीडाश्चदारुणाः॥ दुःस्वप्नंचनृभिर्दृष्टंसुस्वप्नमुपजायते॥१७
वाल्यग्रहाभिभूतानांवालानांशांतिकारकं॥ संघातभेदेचनृणांमैत्रीकरणमुत्त
मं॥१८॥ दुर्वृत्तानामशेषाणांवलहानिकरंपरम्॥ ॥रक्षोभूतपिशाचानांपठनादेव
नाशनम्॥१९॥ सर्वंममैतन्माहात्म्यंममसन्निधिकारकं॥ पशुपुष्पार्घधूपैश्चगन्धदी
पैस्तथोत्तमैः॥२०॥ विप्राणांभोजनैर्होमैःप्रोक्षणीयैरहर्निशं॥ अन्यैश्चविविधैर्भो
गैःप्रदानैर्वत्सरेणया॥२१॥ प्रीतिर्मेक्रियतेसास्मिन्सकृत्सुचरितेश्रुते॥ श्रुतंहरतिपा



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

पानितथारोग्यंप्रयच्छति ॥ २२ ॥ तस्मिन्श्रुतेवैरिकृतंभयंपुंसांनजायते ॥ युष्माभि
स्तुतयोयाश्चयाश्चब्रह्मर्षिभिःकृताः ॥ २४ ॥ ब्रह्मणाचकृतास्तास्तुप्रयच्छंतिशुभां
मतिम् ॥ आरण्येप्रान्तरेवापिदावाग्निपरिवारित ॥ २५ ॥ दस्युभिर्वावृतःशून्येगृहीतो
वापिशत्रुभिः ॥ २६ ॥ सिंहव्याघ्रानुयातोवावनेवावनहस्तिभिः ॥ २६ ॥ राज्ञाक्रुद्धेन
चाज्ञप्तोवध्योवंधगतोऽपिवा ॥ आघूर्णितोवावातेनस्थितःपोतेमहार्णवे ॥ २७
पतत्सुचापिशस्त्रेषुसंग्रामेभृशदारुणे ॥ सर्वावाधासुघोरासुवेदनाभ्यर्दितोऽपिवा ॥ २८

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

स० श. स्मरन्ममैतच्चरितं नरो मुच्येत संकटात् ॥ मम प्रभावात्सिंहाद्या दस्यवो वैरिणस्तथा ॥ २९ ॥

॥ ५८ ॥ दूरादेव पलायन्ते स्मरतश्चरितं मम ॥ ऋषिरुवाच ॥ ३० ॥ इत्युक्त्वा सा भगवती चण्डिका चण्डवि

क्रमा ॥ पश्यतामेव देवानां तत्रैवान्तरधीयत ॥ ३१ ॥ तेपि देवा निरातंका स्वाधिकारान्य

थापुरा ॥ यज्ञभागभुजः सर्वे चक्रुर्विनिहतारयः ॥ ३२ ॥ दैत्याश्च देव्या निहते शुम्भे देवरिपौ यु

धि ॥ जगद्विध्वंसिनि तस्मिन्महोग्रेतुल्यविक्रमे ॥ ३३ ॥ निशुम्भे च महावीर्ये शेषाः पातालमा

ययुः ॥ एवं भगवती देवी सा नित्यापि पुनः पुनः ॥ ३४ ॥ संभूय कुरुते भूप जगतः परिपाल

रा ॥ ५८ ॥

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

नम्रः॥ तयैतन्मोह्यतेविश्वंसैवविश्वंप्रसूयते ॥ ३४ ॥ मायाचिताचविज्ञातंतुष्टाऋद्धिं
प्रयच्छति ॥ व्याप्तंतयैतत्सकलंब्रह्माण्डमनुजेश्वर ॥ महाकाल्यामहाकालेमहामा
रीस्वरूपया ॥ ३५ ॥ सैवकालेमहामारीसैवसृष्टिर्भवत्यजा ॥ स्थितिंकरोतिभूतानां
सैवकालेसनातनी ॥ ३६ ॥ भवकालेनृणांसैवलक्ष्मीर्वृद्धिप्रदागृहे ॥ सैवाभावे
तथालक्ष्मीर्विनाशायोपजायते ॥ ३७ ॥ स्तुतासंपूजितापुष्पैर्धूपगंधादिभिस्तथा ॥
ददातिवित्तंपुत्रांश्चमतिंधर्मेतथाशुभाम् ॥ ३८ ॥ इतिमार्कण्डेयपुराणेसावर्णिकेम

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

१ ध्यानं॥

स॰ श॰

॥५६॥

बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनां॥ पाशांकुशवराभीर्धारयन्तीः
CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi
शिवां भजे॥ ७३॥

१२

त्वन्तोदेवीमात्म्ये शुंभनिशुंभवधः॥ समाप्तः॥ ऋषिरुवाच॥ १ ॥ एतत्ते कथितं
भूपदेवीमाहात्म्यमुत्तमं॥ एवंप्रभावासादेवीययेदंधार्यतेजगत्॥ २ ॥ विद्यात
थैवक्रियतेभगवद्विष्णुमायया॥ तथात्वमेषवैश्यश्चतथैवान्येविवेकिनः ३॥
मोह्यंतेमोहिताश्चैवमोहमेष्यंतिचापरे॥ तामुपैहिमहाराजशरणंपरमेश्वरीम्॥ ४॥
आराधितासैवनृणांभोगस्वर्गापवर्गदा॥ मार्कण्डेयउवाच॥ ६ ॥ इतितस्यवचः
श्रुत्वासुरथः सनराधिपः॥ प्रणिपत्यमहाभागंतमृषिंशंसितव्रतं॥ ७ ॥ निर्विण्णो

रा॰म॰

॥५६॥

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

तिममत्वेनराज्यापहरणेनच॥ जगामसद्यस्तपसेसचवैश्योमहामुने॥८॥
संदर्शनार्थमंवायानदीपुलिनसंस्थितः॥ सचवैश्यस्तपस्तेपेदेवीसूक्तंपरंज
पन्॥९॥तौतस्मिन्पुलिनेदेव्याःकृत्वामूर्तिंमहीमयीम्॥ अर्हणांचक्रतुस्त
स्याःपुष्पधूपाग्नितर्प्पणैः॥१०॥ निराहारौयतात्मानौतन्मनस्कौसमाहितौ
ददतुस्तौवलिंचैवनिजगात्रासृगुक्षितम्॥११॥ एवंसमाराधयतोस्त्रिभि
र्वर्षैर्यतात्मनोः॥ परितुष्टाजगद्धात्रीप्रत्यक्षंप्राहचण्डिका॥१२॥ देव्युवाच॥ ९३॥

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi





यत्प्रार्थ्यते त्वया भूप त्वया च कुलनंदन ॥ मत्तस्तत्प्राप्यतां सर्वं परितुष्टा ददामि तत्
मार्क्कंडेय उवाच ॥ १५ ॥ ततो वव्रे नृपो राज्यमविभ्रंश्यन्यजन्मनि ॥ अत्रैव च निजं रा
ज्यं हतशत्रुबलं बलात् १६ ॥ सोपि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमानसः ॥ ममेत्यहमि
ति प्राज्ञः संगविच्युतिकारकं ॥ १७ देव्युवाच ॥ १८ ॥ स्वल्पैरहोभिर्नृपते स्वं राज्यं प्रा
प्स्यते भवान् ॥ हत्वा रिपूनस्खलितं तव तत्र भविष्यति ॥ १९ ॥ मृतश्च भूयः संप्राप्य
जन्म देवाद्विवस्वतः ॥ सावर्णिको मनुर्नाम भवान्भुवि भविष्यति ॥ २० ॥ वैश्यवर्य्य त्व



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi

६१ ॐ नमो श्रालिकायै ॥ ॥ भावं ॥ नित्य राजं द्रुहामि खलैः परिहितम
पुण्यधर्म्मपरं ॥ माहेश्वामस्तोर्विवं विनसिरवा ॥ मामु को कश्चारतो
॥ घरष्टामालिस्तपादप नवगुणं ॥ नागेशु केयरल्लनि निर्झडालम्मवि
चितं यासि सतत्रे कल्यो कलिशौय दं ॥ इंद्राक्षीनाम मद्भुवनी ॥ नाना
लंकारभूषितां ॥ प्रसन्नवदनां नौडाम च्या नेत्र झोधिता ॥ ॥

तवो पना ज्ञेताप इति जि हल ना उना [illegible] प्र ए अ ना ता शा ५१
[illegible] रव ६ [illegible]

Anish Bhatta Family Collection, Changu Narayan, Bhaktapur

CC0. In Public Domain. Digitization by eGangotri. Funding by MIDF-Delhi



यायस्त्वयोस्मत्तोभिवाञ्छितः ॥ तं प्रयच्छामि संक्षेपेतवज्ञा न भविष्यति ॥ २२ ॥
मार्कण्डेय उवाच ॥ इति दत्वा तयोर्देवी यथाभिलषितं वरम् ॥ बभूवांतर्हिता सद्यो
भक्त्या ताभ्यामभिष्टुता ॥ २३ ॥ एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः सूर्याज्जन्म
समासाद्य सावर्णिर्भविता मनुः ॥ सावर्णिर्भविता मनुः ॥ २४ ॥ इति मार्कण्डेयपुरा
णे सावर्णिके मन्वंतरे देवीमाहात्म्ये सुरथवैश्ययोर्वरप्रदानं नाम ॥ १३ ॥ त्रयोदशोध्याय
स्वस्तिश्रीशाके ॥ १७ ॥ ७३ ॥ संवत् ॥ १९०८ ॥ शुभम् ॥ श्रीरामचन्द्राय नमः ॥
[illegible] ॥ ० ॥



Anish Bhatta Family Collection, Changu Narayan, Bhaktapur